तृ.	अम्बया	अम्बाभ्याम्	अम्बाभिः
च.	अम्बायै	,,	अम्बाभ्यः
प.	अम्बायाः	,,	,,

	एकव०	द्विव०	बहुव०
ष.	अम्बायाः	अम्बयोः	अम्बानाम्
स.	अम्बायाम्	,,	अम्बासु

(अम्बा=माता).

१०५ आबन्तः स्त्रीलिङ्गः 'अक्का' शब्दः

f. An elder sister; a goddess.

प्र.	अक्का	अक्के	अक्काः
स.	हे अक्क	हे ,,	हे ,,
द्वि.	अक्काम्	,,	,,
तृ.	अक्कया	अक्काभ्याम्	अक्काभिः
च	अक्कायै	,,	अक्काभ्यः
प.	अक्कायाः	,,	,,
ष.	,,	अक्कयोः	अक्कानाम्
स	अक्कायाम्	,,	अक्कासु

(अक्का=ज्येष्ठा देवी).

१०६ आबन्तः स्त्रीलिङ्गः 'अल्ला' शब्दः

f. A mother, the supreme goddess.

प्र.	अल्ला	अल्ले	अल्लाः
स.	हे अल्ल	हे ,,	हे ,,
द्वि.	अल्लाम्	,,	,,
तृ.	अल्लया	अल्लाभ्याम्	अल्लाभिः
च.	अल्लायै	,,	अल्लाभ्यः
प	अल्लायाः	,,	,,
ष.	,,	अल्लयोः	अल्लानाम्
स.	अल्लायाम्	,,	अल्लासु

(अल्ला=देवी).

१०७ आबन्तः स्त्रीलिङ्गः 'जरा' शब्दः

f. Old age.

प्र.	जरा	जरे, जरसौ	जराः, जरसः
स.	हे जरे	हे जरे, हे जरसौ	हे जराः, हे जरसः
द्वि.	जराम्, जरसम्	,, ,,	,, ,,

	एकव०	द्विव०	बहुव०
तृ.	जरया, जरसा	जराभ्याम्	जराभिः
च	जरायै, जरसे	,,	जराभ्यः
प.	जरायाः, जरसः	,,	,,
ष.	,, ,,	जरयोः, जरसोः	जराणाम्, जरसाम्
स.	जरायाम्, जरसि	जरयोः, जरसोः	जरासु

(जीर्यते शरीरमनया इति जरा=जीर्णता).

१०८ आबन्तः स्त्रीलिङ्गः 'नासिका' शब्दः

f. A nose.

प्र.	नासिका	नासिके	नासिकाः
स.	हे नासिके	हे ,,	हे ,,
द्वि.	नासिकाम्	,,	,, नसः
तृ.	नासिकया, नसा	नासिकाभ्याम्, नोभ्याम्	नासिकाभिः, नोभिः
च	नासिकायै, नसे	,, ,,	नासिकाभ्यः, नोभ्यः ,, ,,
पं	नासिकायाः, नसः	,, ,,	,, ,, ,, ,,
ष.	,,	नासिकयोः, नसोः	नासिकानाम्, नसाम्
स.	नासिकायाम्, नसि	,, ,,	नासिकासु, नःसु, नस्सु

(नासिका=घोणा).

१०९ आबन्तः स्त्रीलिङ्गः 'निशा' शब्दः

f. A night.

प्र.	निशा	निशे	निशाः
स.	हे निशे	हे ,,	हे ,,
द्वि	निशाम्	,,	निशाः, निशः
तृ.	निशया, निशा	निशाभ्याम्, निड्भ्याम्	निशाभिः, निड्भिः
च.	निशायै, निशे	,, ,,	निशाभ्यः, निड्भ्यः
पं.	निशायाः, निशः	,, ,,	,, ,,

	एकव०	द्विव०	बहुव०
ष	निशायाः, निशः	निशयोः, निशोः	निशानाम्, निशाम्
स.	निशायाम्, निशि	,, ,,	निशासु, निट्त्सु, निट्सु

(निशा=रात्रि).

११० आबन्तः स्त्रीलिङ्गः 'पृतना' शब्दः

f. An army.

प्र.	पृतना	पृतने	पृतनाः
स.	हे पृतने	हे ,,	हे ,,
द्वि	पृतनाम्	,,	पृत , पृतनाः
तृ.	पृता, पृतनया	पृद्भ्याम्, पृतनाभ्याम्	पृद्भिः, पृतनाभिः
च.	पृते, पृतनायै	,, ,,	पृद्भ्यः, पृतनाभ्यः
प.	पृतः, पृतनायाः	,, ,,	,, ,,
ष.	,, पृतनायाः	पृतोः, पृतनयोः	पृतां, पृतनानाम्
स.	पृति, पृतनायाम्	,, ,,	पृत्सु, पृतनासु

(पृतना=सेना).

१११ आकारान्तः स्त्रीलिङ्गः 'गोपा' शब्दः

f. A cow-herd.

प्र.	गोपाः	गोपौ	गोपाः
सं.	हे ,,	हे ,,	हे ,,
द्वि.	गोपाम्	,,	गोपः
तृ.	गोपा	गोपाभ्याम्	गोपाभिः
च.	गोपे	,,	गोपाभ्यः
प.	गोपः	,,	,,
ष.	,,	गोपोः	गोपाम्
स.	गोपि	,,	गोपासु

(गाः पाति इति गोपाः).

एवं–विश्वपा, वर्चोदा, शङ्खध्मा, सोमपा–प्रभृतयः

(2) Feminine Nouns ending in इ.

११२ इकारान्तः स्त्रीलिङ्गः 'मति' शब्दः।

f. Intellect.

एकव०		द्विव०	बहुव०
प्र.	मतिः	मती	मतयः
सं.	हे मते	हे "	हे "
द्वि.	मतिम्	"	मतीः
तृ.	मत्या	मतिभ्याम्	मतिभिः
च.	मत्यै, मतये	"	मतिभ्यः
पं.	मत्याः, मतेः	"	"
ष	" "	मत्योः	मतीनाम्
स.	मत्याम्, मतौ	"	मतिषु

(मन्यते बुध्यते अनया इति मतिः=बुद्धिः).

एवं–रुचि, बुद्धि, गति, हृति, नति, रीति, नीति, आजि, राजि-प्रभृतयः।

११३ इकारान्तः स्त्रीलिङ्गः 'श्रुति' शब्दः।

f. The Vedas.

प्र.	श्रुतिः	श्रुती	श्रुतयः
सं.	हे श्रुते	हे "	हे "
द्वि.	श्रुतिम्	"	श्रुतीः
तृ.	श्रुत्या	श्रुतिभ्याम्	श्रुतिभिः
च.	श्रुत्यै, श्रुतये	"	श्रुतिभ्यः
पं.	श्रुत्याः, श्रुतेः	"	"
ष.	" "	श्रुत्योः	श्रुतीनाम्
स.	श्रुत्याम्, श्रुतौ	"	श्रुतिषु

(श्रूयते इति श्रुतिः=वेदः).

११४ इकारान्तः स्त्रीलिङ्गः 'स्मृति' शब्दः।

f. The law.

प्र.	स्मृतिः	स्मृती	स्मृतयः
सं.	हे स्मृते	हे "	हे "

	एकव०	द्विव०	बहुव०
द्वि.	स्मृतिम्	स्मृती	स्मृतीः
तृ.	स्मृत्या	स्मृतिभ्याम्	स्मृतिभिः
च.	स्मृत्यै, स्मृतये	,,	स्मृतिभ्यः
प.	स्मृत्याः, स्मृतेः	,,	,,
ष.	,, ,,	स्मृत्योः	स्मृतीनाम्
स.	स्मृत्याम्, स्मृतौ	,,	स्मृतिषु

(स्मियते इति स्मृति).

११५ इकारान्तः स्त्रीलिङ्गः नित्यं बहुवचनान्तः 'त्रि' शब्दः।

f. Three.

	बहुव०
प्र.	तिस्रः
स.	हे ,,
द्वि.	,,
तृ.	तिसृभिः
च.	तिसृभ्यः
प.	,,
ष.	तिसृणाम्[1]
स.	तिसृषु

११६ इकारान्तः स्त्रीलिङ्गः 'प्रियत्रि'[2] शब्दः।

f. One liking three good persons.

प्र.	प्रियत्रिः	प्रियत्री	प्रियत्रयः
स	हे प्रियत्रे	हे ,,	हे ,,
द्वि	प्रियत्रिम्	,,	प्रियत्रीः
तृ.	प्रियत्र्या	प्रियत्रिभ्याम्	प्रियत्रिभिः
च	प्रियत्र्यै -त्रये	,,	प्रियत्रिभ्यः
प.	प्रियत्र्याः-त्रेः	,,	,,
ष.	,, ,,	प्रियत्र्योः	प्रियत्रयाणाम्,[3] प्रियत्रीणाम्
स.	प्रियत्र्याम्-त्रौ	,,	प्रियत्रिषु

(प्रियाः त्रयः पुरुषा यस्याः सा प्रियात्रि=प्रियत्रिपुरुषा).

---

१ 'तिसृ', 'चतसृ' इत्यनयो षष्ठीबहुवचने दीर्घो न भवति।

२ यदा 'त्रि' शब्दवाच्योऽर्थ पुरुष तदाय 'प्रियत्रि' शब्दः 'मति' शब्दवत्।

३ षष्ठीबहुवचने रूपद्वयम्।

११७ इकारान्तः स्त्रीलिङ्गः 'प्रियत्रि' शब्दः ।

	एकव०	द्विव०	बहुव०
प्र.	प्रियतिसा	प्रियतिस्रौ	प्रियतिस्रः
सं.	हे प्रियतिसः	हे प्रियतिस्रौ	हे प्रियतिस्रः
द्वि.	प्रियतिस्रम्	प्रियतिस्रौ	प्रियतिस्रः
तृ.	प्रियतिस्रा	प्रियतिसृभ्याम्	प्रियतिसृभिः
च.	प्रियतिस्रे	प्रियतिसृभ्याम्	प्रियतिसृभ्यः
पं.	प्रियतिस्रः	प्रियतिसृभ्याम्	प्रियतिसृभ्यः
ष.	प्रियतिस्रः	प्रियतिस्रोः	प्रियतिसृणाम्
स.	प्रियतिस्रि	प्रियतिस्रोः	प्रियतिसृषु

(प्रियाः तिस्रः यस्याः सा प्रियतिसा=प्रियत्रिस्त्री).

११८ इकारान्तः स्त्रीलिङ्गः सर्वनामसञ्ज्ञको नित्य-द्विवचनान्तः 'द्वि' शब्दः ।

f. Two.

प्र.	द्वे
सं.	हे ,,
द्वि.	,,
तृ.	द्वाभ्याम्
च.	,,
पं.	,,
ष.	द्वयोः
स.	,,

---

(3) Feminine Nouns ending in ई.

ईकारान्तः स्त्रीलिङ्गः

Terminations.

प्र.	—	औ	अस्
सं.	—	,,	,,
द्वि.	म्	औ	इस्
तृ.	आ	भ्याम्	भिस्
च.	ऐ	,,	भ्यस्

एकव०	द्विव०	बहुव०
पं. आस्	भ्याम्	भ्यस्
ष. ,,	ओस्	नाम्
स. आम्	,,	सु

११९ ईबन्तः स्त्रीलिङ्गः 'गौरी' शब्दः।

f. A name of a goddess.

प्र. गौरी	गौर्यौ	गौर्यः
सं. हे गौरि	हे ,,	हे ,,
द्वि. गौरीम्	,,	गौरीः
तृ. गौर्या	गौरीभ्याम्	गौरीभिः
च. गौर्यै	,,	गौरीभ्यः
प. गौर्याः	,,	,,
ष. ,,	गौर्योः	गौरीणाम्
स. गौर्याम्	,,	गौरीषु

(गौरी=गौरवर्णा, पार्वती).

एवं-देवी, कल्याणी, ब्रह्माणी, इन्द्राणी, शर्वाणी, मृडानी, भवानी-प्रभृतयः।

१२० ईबन्तः स्त्रीलिङ्गः 'वाणी' शब्दः।

f. Speech.

प्र. वाणी	वाण्यौ	वाण्यः
सं. हे वाणि	हे ,,	हे ,,
द्वि. वाणीम्	,,	वाणीः
तृ. वाण्या	वाणीभ्याम्	वाणीभिः
च. वाण्यै	,,	वाणीभ्यः
पं. वाण्याः	,,	,,
ष. ,,	वाण्योः	वाणीनाम्
स. वाण्याम्	,,	वाणीषु

(वण्यते शब्द्यते इति वाणी=वाक्).

१२१ ईबन्तः स्त्रीलिङ्गः 'नदी' शब्दः।

f. A river.

प्र. नदी	नद्यौ	नद्यः
सं. हे नदि	हे ,,	हे ,,

	एकव०	द्विव०	बहुव०
द्वि.	नदीम्	नद्यौ	नदीः
तृ.	नद्या	नदीभ्याम्	नदीभिः
च.	नद्यै	,,	नदीभ्यः
पं.	नद्याः	,,	,,
ष.	,,	नद्योः	नदीनाम्
स.	नद्याम्	,,	नदीषु

(नदति शब्दं करोति इति नदी=सरित्).

१२२ ईकारान्तः स्त्रीलिङ्गः 'सखी' शब्दः।

f A female friend

प्र.	सखी	सख्यौ	सख्यः
सं.	हे सखि	हे ,,	हे ,,
द्वि.	सखीम्	,,	सखीः
तृ.	सख्या	सखीभ्याम्	सखीभिः
च.	सख्यै	,,	सखीभ्यः
प.	सख्याः	,,	,,
ष.	,,	सख्योः	सखीनाम्
स.	सख्याम्	,,	सखीषु

(सखी=वयस्या).

एवम्—अशिश्वी.

१२३ ईकारान्तः स्त्रीलिङ्गः 'लक्ष्मी'[१] शब्दः।

f. A goddess.

प्र	लक्ष्मीः	लक्ष्म्यौ	लक्ष्म्यः
स.	हे लक्ष्मि	हे ,,	हे ,,
द्वि.	लक्ष्मीम्	,,	लक्ष्मीः
तृ.	लक्ष्म्या	लक्ष्मीभ्याम्	लक्ष्मीभिः
च.	लक्ष्म्यै	,,	लक्ष्मीभ्यः
प.	लक्ष्म्याः	,,	,,

१ अवीलक्ष्मीतरीतन्त्रीह्रीधीश्रीणां प्रथमैकवचने विसर्गः।

एकव०	द्विव०	बहुव०
ष. लक्ष्म्याः	लक्ष्म्योः	लक्ष्मीणाम्
स. लक्ष्म्याम्	,,	लक्ष्मीषु

(लक्ष्यते ऐश्वर्यचिह्नेन इति लक्ष्मी.).

एवम्—अवी, ह्री, धी, श्री.

१२४ ईकारान्तः स्त्रीलिङ्गः 'तरी' शब्दः।

f. A boat.

प्र. तरीः	तर्यौ	तर्यः
सं. हे तरि	हे ,,	हे ,,
द्वि. तरीम्	,,	तरीः
तृ. तर्या	तरीभ्याम्	तरीभिः
च. तर्यै	,,	तरीभ्यः
प. तर्याः	,,	,,
ष. ,,	तर्योः	तरीणाम्
स. तर्याम्	,,	तरीषु

(तरन्ति अनया इति तरीः=नौः).

१२५ ईकारान्तः स्त्रीलिङ्गः 'तन्त्री' शब्दः।

f. A lute.

प्र तन्त्रीः	तन्त्र्यौ	तन्त्र्यः
सं हे तन्त्रि	हे ,,	हे ,,
द्वि. तन्त्रीम्	,,	तन्त्रीः
तृ. तन्त्र्या	तन्त्रीभ्याम्	तन्त्रीभिः
च. तन्त्र्यै	,,	तन्त्रीभ्यः
प. तन्त्र्याः	,,	,,
ष. ,,	तन्त्र्योः	तन्त्रीणाम्
स. तन्त्र्याम्	,,	तन्त्रीषु

(तन्त्री =वीणा).

१२६ ईवन्तः स्त्रीलिङ्गः 'स्त्री' शब्दः।

f. A woman.

प्र. स्त्री	स्त्रियौ	स्त्रियः
सं. हे स्त्रि	हे ,,	हे ,,

एकव॰	द्विव॰	बहुव॰
द्वि. स्त्रियम्, स्त्रीम्	स्त्रियौ	स्त्रियः, स्त्रीः
तृ. स्त्रिया	स्त्रीभ्याम्	स्त्रीभिः
च. स्त्रियै	"	स्त्रीभ्यः
प. स्त्रियाः	"	"
ष. "	स्त्रियोः	स्त्रीणाम्
स. स्त्रियाम्	"	स्त्रीषु

(स्त्यायेते सङ्घीभवतः शुक्रशोणिते यस्यां सा स्त्री=नारी).

१२७ इकारान्तः स्त्रीलिङ्गः 'अतिस्त्रि' शब्दः।

f. A beautiful wooden doll.

प्र. अतिस्त्रिः	अतिस्त्रियौ	अतिस्त्रियः
स. हे अतिस्त्रे	हे "	हे "
द्वि. { अतिस्त्रियम्, अतिस्त्रिम्	"	{ अतिस्त्रियः, अतिस्त्रीः
तृ. अतिस्त्रिया	अतिस्त्रिभ्याम्	अतिस्त्रिभिः
च. { अतिस्त्रियै, अतिस्त्रये	"	अतिस्त्रिभ्यः
प. { अतिस्त्रियाः, अतिस्त्रेः	"	"
ष. { " "	अतिस्त्रियोः	अतिस्त्रीणाम्
स. { अतिस्त्रियाम्, अतिस्त्रौ	"	अतिस्त्रिषु

(स्त्रियमतिक्रान्ता इति अतिस्त्रिः=काष्ठपुत्तली).

१२८ ईकारान्तः स्त्रीलिङ्गः 'श्री' शब्दः।

f. A goddess.

प्र. श्रीः	श्रियौ	श्रियः
स. हे "	हे "	हे "
द्वि. श्रियम्	"	"
तृ. श्रिया	श्रीभ्याम्	श्रीभिः
च. श्रियै, श्रिये	"	श्रीभ्यः
पं. श्रियाः, श्रियः	"	"

एकव०	द्विव०	बहुव०
ष. श्रियाः, श्रियः	श्रियोः	श्रियाम्, श्रीणाम्
स. श्रियाम्, श्रियि	,,	श्रीषु

(अयति हरिमिति श्रीः).

१२९ ईकारान्तः स्त्रीलिङ्गः 'प्रधी' शब्दः ।

f. m. One having great intelligence.

प्र. प्रधीः	प्रध्यौ	प्रध्यः
स. हे प्रधि	हे ,,	हे ,,
द्वि. प्रध्यम्	,,	,,
तृ. प्रध्या	प्रधीभ्याम्	प्रधीभिः
च. प्रध्यै	,,	प्रधीभ्यः
प. प्रध्याः	,,	,,
ष. ,,	प्रध्योः	प्रधीनाम्
स. प्रध्याम्	,,	प्रधीषु

(१ प्रकृष्टा चासौ धीश्च प्रधीः, २ प्रकृष्टा धीर्यस्याः सा इति वा प्रधीः).

१३० ईकारान्तः स्त्रीलिङ्गः 'सुधी' शब्दः ।

f. One having good intellegence.

प्र. सुधीः	सुधियौ	सुधियः
सं. हे ,,	हे ,,	हे ,,
द्वि. सुधियम्	,,	,,
तृ. सुधिया	सुधीभ्याम्	सुधीभिः
च. सुधियै, सुधिये	,,	सुधीभ्यः
पं. सुधियाः, सुधियः	,,	,,
ष. ,, ,,	सुधियोः	सुधीनाम्, सुधियाम्
स. सुधियाम्	,,	सुधीषु

(१ सुष्ठु धीः सुधीः, २ सुष्ठु ध्यायति इति सुधीः, ३ सुष्ठु धीर्यस्याः सा इति वा सुधीः).

१३१ ईकारान्तः स्त्रीलिङ्गः 'ग्रामणी' शब्दः ।

f. One leading a village.

प्र. ग्रामणीः	ग्रामण्यौ	ग्रामण्यः
सं. हे ,,	हे ,,	हे ,,

	एकव०	द्विव०	बहुव०
द्वि.	ग्रामण्यम्	ग्रामण्यौ	ग्रामण्यः
तृ.	ग्रामण्या	ग्रामणीभ्याम्	ग्रामणीभिः
च.	ग्रामण्ये	,,	ग्रामणीभ्यः
प.	ग्रामण्यः	,,	,,
ष.	,,	ग्रामण्योः	ग्रामण्याम्
स.	ग्रामण्याम्[१]	,,	ग्रामणीषु

(ग्राम नयति अधिकरोति इति ग्रामणी =ग्रामाधिकारिणि).

(4) Feminine Nouns ending in उ, ऊ

१३२ उकारान्तः स्त्रीलिङ्गः 'धेनु' शब्दः ।

f. A cow.

प्र	धेनुः	धेनू	धेनवः
स	हे धेनो	हे ,,	हे ,,
द्वि.	धेनुम्	,,	धेनूः
तृ.	धेन्वा	धेनुभ्याम्	धेनुभिः
च	धेन्वै, धेनवे	धेनुभ्याम्	धेनुभ्यः
प.	धेन्वाः, धेनोः	,,	,,
ष.	,, ,,	धेन्वोः	धेनूनाम्
स.	धेन्वाम्, धेनौ	,,	धेनुषु

(धिनोति प्रीणयति दुग्धादिना इति धेनुः=गौः).

एव—मृदु, गुरु, बहु-प्रभृतय ।

१३३ उकारान्तः स्त्रीलिङ्गः 'क्रोष्टु' शब्दः ।

f. A Jackal.

प्र.	क्रोष्टी	क्रोष्ट्र्यौ	क्रोष्ट्र्यः
स.	हे क्रोष्टि	हे ,,	हे ,,
द्वि.	क्रोष्टीम्	,,	क्रोष्टीः
तृ	क्रोष्ट्र्या	क्रोष्टीभ्याम्	क्रोष्टीभिः
च.	क्रोष्ट्र्यै	,,	क्रोष्टीभ्यः

१ 'नी' शब्दात् परस्य सप्तम्येकवचनस्य स्थाने 'आम्' भवति. ग्रामण्याम् ।

एकव०	द्विव०	बहुव०
पं. क्रोष्ट्र्याः	क्रोष्टीभ्याम्	क्रोष्टीभ्यः
ष. ,,	क्रोष्ट्र्योः	क्रोष्टीणाम्
स. क्रोष्ट्र्याम्	,,	क्रोष्टीषु

(क्रोशति इति क्रोष्टी=जम्बुकी).

१३४ ऊकारान्तः स्त्रीलिङ्गः 'वधू' शब्दः ।

f A wife.

प्र. वधूः	वध्वौ	वध्वः
स हे वधु	हे,,	हे,,
द्वि. वधूम्	,,	वधूः
तृ. वध्वा	वधूभ्याम्	वधूभिः
च. वध्वै	,,	वधूभ्यः
प. वध्वाः	,,	,,
ष. ,,	वध्वोः	वधूनाम्
स. वध्वाम्	,,	वधूषु

(वधू=जाया).

१३५ ऊकारान्तः स्त्रीलिङ्गः 'भ्रू' शब्दः ।

f. A brow.

प्र. भ्रूः	भ्रुवौ	भ्रुवः
स. हे भ्रूः	हे भ्रुवौ	हे भ्रुवः
द्वि. भ्रुवम्	भ्रुवौ	भ्रुवः
तृ. भ्रुवा	भ्रूभ्याम्	भ्रूभिः
च. भ्रुवै, भ्रुवे	,,	भ्रूभ्यः
प. भ्रुवाः, भ्रुवः	,,	,,
ष. ,, ,,	भ्रुवोः	भ्रूणाम्, भ्रुवाम्
स. भ्रुवाम्, भ्रुवि	,,	भ्रूषु

(भ्रू=भ्रुकुटिः).

१३६ ऊकारान्तः स्त्रीलिङ्गः 'खलपू' शब्दः।

f. A sweeper.

प्र. खलपूः	खलप्वौ	खलप्वः
स. हे,,	हे ,,	हे ,,

एकव०	द्विव०	बहुव०
द्वि. खलप्वम्	खलप्वौ	खलप्वः
तृ. खलप्वा	खलपूभ्याम्	खलपूभिः
च. खलप्वै	,,	खलपूभ्यः
प. खलप्वाः	,,	,,
ष. ,,	खलप्वोः	खलपूनाम्
स. खलप्वाम्	,,	खलपूषु

(खलान् पुनाति इति खलपूः=दुर्जनपावनी, मलसंमार्जिका वा).

एवं–सुलू, करभू, कारभू, दृन्भू–प्रभृतयः।

१३७ ऊकारान्तः स्त्रीलिङ्गः 'वर्षाभू' शब्दः।

f. A frog.

प्र. वर्षाभूः	वर्षाभ्वौ	वर्षाभ्वः
स. हे वर्षाभु	हे,,	हे,,
द्वि. वर्षाभ्वम्	,,	,,
तृ. वर्षाभ्वा	वर्षाभूभ्याम्	वर्षाभूभिः
च वर्षाभ्वै	,,	वर्षाभूभ्यः
प वर्षाभ्वाः	,,	,,
ष. ,,	वर्षाभ्वोः	वर्षाभूणाम्
स. वर्षाभ्वाम्	,,	वर्षाभूषु

(वर्षासु भवति इति वर्षाभूः=मण्डूकी).

एवं–प्रसू, वीरसू–प्रभृतयः।

१३८ ऊकारान्तः स्त्रीलिङ्गः 'पुनर्भू' शब्दः।

f. One re-married.

एकव०	द्विव०	बहुव०
प्र. पुनर्भूः	पुनर्भ्वौ	पुनर्भ्वः
स. हे पुनर्भु	हे,,	हे,,
द्वि. पुनर्भ्वम्	,,	,,
तृ. पुनर्भ्वा	पुनर्भूभ्याम्	पुनर्भूभिः
च. पुनर्भ्वै	,,	पुनर्भूभ्यः
प. पुनर्भ्वाः	,,	,,

एकव०	द्विव०	बहुव०
ष. पुनर्भ्वोः	पुनर्भ्वोः	पुनर्भूणाम्
स. पुनर्भ्वाम्	,,	पुनर्भूषु

(पुनः भवति इति पुनर्भू =द्विरूढा).

१३९ ऊकारान्तः स्त्रीलिङ्गः 'स्वयंभू' शब्दः ।

f. Self-existent.

प्र. स्वयंभूः	स्वयंभुवौ	स्वयंभुवः
सं. हे ,,	हे ,,	हे ,,
द्वि. स्वयंभुवम्	,,	,,
तृ. स्वयंभुवा	स्वयंभूभ्याम्	स्वयंभूभिः
च. स्वयंभुवे, स्वयंभुवै	,,	स्वयंभूभ्यः
पं. स्वयंभुवः, स्वयंभुवाः	,,	,,
ष. ,, ,,	स्वयंभुवोः	स्वयंभुवाम्
स. स्वयंभुवि, स्वयंभुवाम्	,,	स्वयंभूषु

(स्वयं भवति इति स्वयम्भूः=महामाया).

एवं-परमलू, लू, काराभू, दृग्भूशब्दाः ।

---

(5) Feminine Nouns ending in ऋ.

१४० ऋकारान्तः स्त्रीलिङ्गः 'स्वसृ' शब्दः ।

f. A sister.

प्र. स्वसा	स्वसारौ	स्वसारः
सं. हे स्वसः	हे ,,	हे ,,
द्वि. स्वसारम्	,,	स्वसॄः
तृ. स्वस्रा	स्वसृभ्याम्	स्वसृभिः
च. स्वस्रे	,,	स्वसृभ्यः
पं. स्वसुः	,,	,,
ष. स्वसुः	स्वस्रोः	स्वसृणाम्
स. स्वसरि	,,	स्वसृषु

(स्वसा=भगिनी).

१४१ ऋकारान्तः स्त्रीलिंगो 'मातृ' शब्दः ।

f. A mother.

	एकव०	द्विव०	बहुव०
प्र.	माता	मातरौ	मातरः
सं.	हे मातः	हे ,,	हे ,,
द्वि.	मातरम्	मातरौ	मातॄः
तृ.	मात्रा	मातृभ्याम्	मातृभिः
च.	मात्रे	,,	मातृभ्यः
पं.	मातुः	,,	,,
ष.	,,	मात्रोः	मातॄणाम्
स.	मातरि	,,	मातृषु

(मिनोति गर्भाशये इति माता).

एव–दुहितृ, ननान्दृ.

१४२ ऋकारान्तः स्त्रीलिङ्गः 'यातृ' शब्दः ।

f. Husband's brother's wife.

प्र.	याता	यातरौ	यातरः
स	हे यातः	हे ,,	हे ,,
द्वि.	यातरम्	यातरौ	यातॄः
तृ.	यात्रा	यातृभ्याम्	यातृभिः
च	यात्रे	,,	यातृभ्यः
प.	यातुः	,,	,,
ष	,,	यात्रोः	यातॄणाम्
स.	यातरि	,,	यातृषु

(याता=देवरपत्नी).

(6) Feminine Nouns ending in ओ, औ.

१४३ ओकारान्तः स्त्रीलिङ्गः 'गो' शब्दः ।

f. A cow.

प्र.	गौः	गावौ	गावः
सं.	हे ,,	हे ,,	हे ,,

एकव०	द्विव०	बहुव०
द्वि. गाम्	गावौ	गाः
तृ. गवा	गोभ्याम्	गोभिः
च. गवे	,,	गोभ्यः
प. गोः	,,	,,
ष. ,,	गवोः	गवाम्
स. गवि	,,	गोषु

(गच्छति इति गौः=धेनुः).

१४४ ओकारान्तः स्त्रीलिङ्गः 'द्यो' शब्दः ।

f The sky.

प्र द्यौः	द्यावौ	द्यावः
स हे ,	हे ,,	हे ,,
द्वि. द्याम्	,,	द्याः
तृ. द्यवा	द्योभ्याम्	द्योभिः
च. द्यवे	,,	द्योभ्यः
पं. द्योः	,,	,,
ष. ,,	द्यवोः	द्यवाम्
स. द्यवि	,,	द्योषु

(दीव्यति चकास्ति इति द्यौः स्वर्गः).

१४५ औकारान्तः स्त्रीलिङ्गः 'नौ' शब्दः ।

f. A boat.

प्र. नौः	नावौ	नावः
सं. हे ,,	हे ,,	हे ,,
द्वि. नावम्	,,	,,
तृ. नावा	नौभ्याम्	नौभिः
च. नावे	,,	नौभ्यः
पं. नावः	,,	,,
ष. ,,	नावोः	नावाम्
स. नावि	,,	नौषु

(नौः=तरीः).

इत्यजन्तस्त्रीलिङ्गशब्दाः ।

CHAPTER IV.

(1) Neuter nouns ending अ and आ.

नपुंसकलिंग.

Terminations.

	एकव०	द्विव०	बहुव०
प्र.	म्	ई	आनि
सं.	—	,,	,,
द्वि.	म्	,,	,,
तृ.	इन	भ्याम्	ऐस्
च.	य	,,	भ्यस्
पं.	आत्	,,	,,
ष.	स्य	ओस्	नाम्
स.	इ	,,	सु

अथाजन्तनपुंसकलिङ्गशब्दाः ।

१४६ अकारान्तो नपुंसकलिङ्गः 'ज्ञान' शब्दः ।

n. Knowledge.

प्र.	ज्ञानम्	ज्ञाने	ज्ञानानि
स.	हे ज्ञान	हे ज्ञाने	हे ज्ञानानि
द्वि.	ज्ञानम्	ज्ञाने	ज्ञानानि
तृ.	ज्ञानेन	ज्ञानाभ्याम्	ज्ञानैः
च.	ज्ञानाय	ज्ञानाभ्याम्	ज्ञानेभ्यः
पं.	ज्ञानात्	ज्ञानाभ्याम्	ज्ञानेभ्यः
ष.	ज्ञानस्य	ज्ञानयोः	ज्ञानानाम्
स.	ज्ञाने	ज्ञानयोः	ज्ञानेषु

(ज्ञायते अनेन इति ज्ञानम्=बोधः).

एवं-धन, वन, सदन, कदन, वदन, दर्शन, स्पर्शन, अद्वैत, चैतन्य-प्रभृतयः.

१४७ अकारान्तो नपुंसकलिङ्गः सर्वनामसञ्ज्ञकः 'कतर' शब्दः ।

n. Who or which of two.

प्र	कतरत्, कतरद्	कतरे	कतराणि

	एकव०	द्विव०	बहुव०
सं.	हे कतरत्, हे कतरद्	हे कतरे	हे कतराणि
द्वि.	कतरत्, कतरद्	कतरे	कतराणि
तृ.	कतरेण	कतराभ्याम्	कतरैः
च.	कतरस्मै	कतराभ्याम्	कतरेभ्यः
पं.	कतरस्मात्	कतराभ्याम्	कतरेभ्यः
ष.	कतरस्य	कतरयोः	कतरेषाम्
स.	कतरस्मिन्	कतरयोः	कतरेषु

(द्वयोर्मध्ये किम् इति=कतरत्).

१४८ अकारान्तो नपुंसकलिङ्गः सर्वनामसञ्ज्ञकः 'कतम' शब्दः ।

n. Who or which of many.

प्र.	कतमत्, कतमद्	कतमे	कतमानि
सं.	हे कतमत्, हे कतमद्	हे कतमे	हे कतमानि
द्वि.	कतमत्, कतमद्	कतमे	कतमानि
तृ.	कतमेन	कतमाभ्याम्	कतमैः
च.	कतमस्मै	कतमाभ्याम्	कतमेभ्यः
पं.	कतमस्मात्	कतमाभ्याम्	कतमेभ्यः
ष.	कतमस्य	कतमयोः	कतमेषाम्
स.	कतमस्मिन्	कतमयोः	कतमेषु

(बहूनां मध्ये किम् इति=कतमत्).

१४९ अकारान्तो नपुंसकलिङ्गः सर्वनामसञ्ज्ञकः 'इतर' शब्दः ।

n. Other.

प्र.	इतरत्, इतरद्	इतरे	इतराणि
सं.	हे इतरत्, हे इतरद्	हे इतरे	हे इतराणि

	एकव०	द्विव०	बहुव०
द्वि	इतरत्, इतरद्	इतर	इतराणि
तृ	इतरेण	इतराभ्याम	इतरै
च	इतरस्मै	इतराभ्याम्	इतरेभ्यः
प	इतरस्मात	इतराभ्याम्	इतरेभ्य
ष	इतरस्य	इतरया	इतरेषाम्
स	इतरस्मिन्	इतरयो	इतरेषु

(इतरत्=अन्यत्).

१५० अकारान्तो नपुंसकलिङ्ग सर्वनामसञ्ज्ञकः 'अन्य' शब्द ।

n Another.

प्र	अन्यत, अन्यद्	अन्य	अन्यानि
स	हे अन्यम, हे अन्यद्	हे अन्ये	हे अन्यानि
द्वि	अन्यत्, अन्यद्	अन्ये	अन्यानि
तृ	अन्येन	अन्याभ्याम्	अन्यै
च	अन्यस्मै	अन्याभ्याम	अन्यभ्यः
प	अन्यस्मात्	अन्याभ्याम्	अन्यभ्य
ष	अन्यस्य	अन्ययो	अन्येषाम्
स	अन्यस्मिन	अन्ययो	अन्यषु

(अन्यत=इतरत्)

१५१ अकारान्तो नपुंसकलिङ्ग सर्वनामसञ्ज्ञकः 'अन्यतर' शब्द. ।

n Either of two.

प्र	अन्यतरत्, अन्यतरद्	अन्यतरे	अन्यतराणि
स	हे अन्यतरत्, हे अन्यतरद्	हे अन्यतरे	हे अन्यतराणि
द्वि	अन्यतरत, अन्यतरद्	अन्यतरे	अन्यतराणि

	एकव०	द्विव०	बहुव०
तृ.	अन्यतरेण	अन्यतराभ्याम्	अन्यतरैः
च.	अन्यतरस्मै	अन्यतराभ्याम्	अन्यतरेभ्यः
पं.	अन्यतरस्मात्	अन्यतराभ्याम्	अन्यतरेभ्यः
ष.	अन्यतरस्य	अन्यतरयोः	अन्यतरेषाम्
स.	अन्यतरस्मिन्	अन्यतरयोः	अन्यतरेषु

(द्वयोर्मध्ये एकमन्यतरत्).

१५२ अकारान्तो नपुंसकलिङ्गः 'अन्यतम'[1] शब्दः ।

n. One of many.

प्र.	अन्यतमम्	अन्यतमे	अन्यतमानि
स.	हे अन्यतम	हे अन्यतमे	हे अन्यतमानि
द्वि.	अन्यतमम्	अन्यतमे	अन्यतमानि
तृ.	अन्यतमेन	अन्यतमाभ्याम्	अन्यतमैः
च	अन्यतमाय	अन्यतमाभ्याम्	अन्यतमेभ्यः
पं.	अन्यतमात्	अन्यतमाभ्याम्	अन्यतमेभ्यः
ष	अन्यतमस्य	अन्यतमयोः	अन्यतमानाम्
स.	अन्यतमे	अन्यतमयोः	अन्यतमेषु

(बहूनां मध्ये एकमन्यतमम्).

१५३ अकारान्तो नपुंसकलिङ्गः सर्वनामसञ्ज्ञकः 'एकतर' शब्दः ।

n. One of two.

प्र.	एकतरम्	एकतरे	एकतराणि
स.	हे एकतर	हे एकतरे	हे एकतराणि
द्वि.	एकतरम्	एकतरे	एकतराणि
तृ.	एकतरेण	एकतराभ्याम्	एकतरैः
च.	एकतरस्मै	एकतराभ्याम्	एकतरेभ्यः
प.	एकतरस्मात्	एकतराभ्याम्	एकतरेभ्यः

१ अस्य सर्वनामसञ्ज्ञा नास्ति । तमप्प्रत्ययान्तत्वात् 'डतमच्' प्रत्ययान्तत्वाभावात् ।

	एकव॰	द्विव॰	बहुव॰
ष.	एकतरस्य	एकतरयोः	एकतरेषाम्
स.	एकतरस्मिन्	एकतरयोः	एकतरेषु

(एकतरं=किमप्येकम्)

१५४ अकारान्तो नपुंसकलिङ्गः 'अजर' शब्दः ।

n. One ever young.

प्र.	अजरसम्, अजरम्	अजरसी, अजरे	अजरांसि, अजराणि
स.	हे अजर	हे अजरसी, हे अजरे	हे अजरांसि, हे अजराणि
द्वि.	अजरसम्, अजरम्	अजरसी, अजरे	अजरांसि, अजराणि
तृ.	अजरसा, अजरेण	अजराभ्याम्	अजरसैः, अजरैः
च.	अजरसे, अजराय	अजराभ्याम्	अजरेभ्यः
प	अजरसः, अजरात्	अजराभ्याम्	अजरेभ्यः
ष.	अजरसः, अजरस्य	अजरसोः, अजरयोः	अजरसाम्, अजराणाम्
स.	अजरसि, अजरे	अजरसोः, अजरयोः	अजरेषु

(नास्ति जरा यस्य तत् अजरम्=तरुणम् देवकुलम्).

१५५ अकारान्तो नपुंसकलिङ्गः 'हृदय' शब्दः ।

n. The heart.

प्र.	हृदयम्	हृदये	हृदयानि
सं.	हे हृदय	हे हृदये	हे हृदयानि
द्वि.	हृदयम्	हृदये	हृदयानि, हृन्दि
तृ.	हृदयेन, हृदा	हृदयाभ्याम्, हृद्भ्याम्	हृदयैः, हृद्भिः
च	हृदयाय, हृदे	हृदयाभ्याम्, हृद्भ्याम्	हृदयेभ्यः, हृद्भ्यः
प.	हृदयात्, हृदः	हृदयाभ्याम्, हृद्भ्याम्	हृदयेभ्यः, हृद्भ्यः

	एकव०	द्विव०	बहुव०
ष.	हृदयस्य, हृदः	हृदययोः, हृदोः	हृदयानाम्, हृदाम्
स.	हृदये, हृदि	हृदययोः, हृदोः	हृदयेषु, हृत्सु

(हरति गृह्णाति वस्तुयथातथ्यम् इति हृदयम्).

१५६ अकारान्तो नपुंसकलिङ्गः 'उदक' शब्दः ।

n. Water.

प्र.	उदकम्	उदके	उदकानि
स	हे उदक	हे उदके	हे उदकानि
द्वि.	उदकम्	उदके	उदकानि, उदानि
तृ.	उदकेन, उद्ना	उदकाभ्याम्, उदभ्याम्	उदकैः, उदभिः
च.	उदकाय, उद्ने	उदकाभ्याम्, उदभ्याम्	उदकेभ्यः, उदभ्यः
पं.	उदकात्, उद्नः	उदकाभ्याम्, उदभ्याम्	उदकेभ्यः, उदभ्यः
ष.	उदकस्य, उद्नः	उदकयोः, उद्नोः	उदकानाम्, उद्नाम्
स.	उदके, उद्नि, उदनि	उदकयोः, उद्नोः	उदकेषु, उदसु

(उदकम्=जलम्).

१५७ अकारान्तो नपुंसकलिङ्गः 'आस्य' शब्दः ।

n. The mouth.

प्र.	आस्यम्	आस्ये	आस्यानि
स.	हे आस्य	हे आस्ये	हे आस्यानि
द्वि.	आस्यम्	आस्ये	आस्यानि, आसानि
तृ.	आस्येन, आस्ना	आस्याभ्याम्, आसभ्याम्	आस्यैः, आसभिः
च.	आस्याय, आस्ने	आस्याभ्याम्, आसभ्याम्	आस्येभ्यः, आसभ्यः

	एकव०	द्विव०	बहुव०
प	आस्यात्, आस्नः	आस्याभ्याम्, आसभ्याम्	आस्यभ्यः आसभ्य
ष	आस्यस्य, आस्न	आस्ययो आस्ना	आस्यानाम्, आस्नाम्
स	आस्ये, आस्नि, आसनि	आस्ययो आस्ना	आस्येषु आससु

(अस्यते क्षिप्यतेऽन्नमस्मिन्निति आस्यम्=मुखम्)

१५८ अकारान्तो नपुसकलिङ्ग 'मांस' शब्द ।

n Flesh

प्र	मासम्	मासे	मासानि
स	हे मास	हे मासे	हे मासानि
द्वि	मासम	मासे	मासानि मांसि
तृ	मासेन, मासा	मासाभ्याम, मान्भ्याम	मासैः, मान्भिः
च	मासाय, मासे	मासाभ्याम, मान्भ्याम	मासभ्य, मान्भ्य
प	मासात, मास	मासाभ्याम मान्भ्याम	मासभ्य, मान्भ्य
ष	मासस्य मास	मासया मासो	मासानाम, मासाम
स	मासे मांसि	मासयो, मासो	मासषु मान्सु

(मासम्=पिशितम्).

१५९ आकारान्तो नपुंसकलिङ्गः 'श्रीपा' शब्दः ।

n Wealthy

प्र	श्रीपम	श्रीपे	श्रीपाणि
स	हे श्रीप	हे श्रीपे	हे श्रीपाणि

---

१ नपुसकलिङ्गे आ कारान्तशब्दाना स्थाने 'अ कारान्तशब्दा प्रयोक्तव्या । यथा 'श्रीपा इत्यस्य स्थाने श्रीप इति । एव विश्वपा इत्यस्य स्थाने विश्वप इति 'शङ्खध्मा इत्यत्र शङ्खध्म इति । एव सर्वत्र ज्ञेयम् ।

	एकव०	द्विव०	बहुव०
द्वि.	श्रीपम्	श्रीपे	श्रीपाणि
तृ.	श्रीपेण	श्रीपाभ्याम्	श्रीपैः
च.	श्रीपाय	श्रीपाभ्याम्	श्रीपेभ्यः
प.	श्रीपात्	श्रीपाभ्याम्	श्रीपेभ्यः
ष.	श्रीपस्य	श्रीपयोः	श्रीपाणाम्
स.	श्रीपे	श्रीपयोः	श्रीपेषु

(श्रियं पाति इति श्रीपम्=धनाढ्यम्)

एवं–गोपा, विश्वपा, शङ्खध्मा, प्रभृतयः ।

---

(2) Nouns ending in इ.

नपुंसकलिङ्ग.

Terminations.

प्र.	—	ई	इ
सं.	—	,,	,,
द्वि.	—	,,	,,
तृ.	आ	भ्याम्	भिस्
च.	ए	,,	भ्यस्
पं.	अस्	,,	,,
ष.	,,	ओस्	नाम्
स.	इ	,,	सु

१६० इकारान्तो नपुंसकलिङ्गः 'वारि' शब्दः ।

n. Water.

प्र.	वारि	वारिणी	वारीणि
स.	{ हे वारे, हे वारि	हे वारिणी	हे वारीणि
द्वि.	वारि	वारिणी	वारीणि
तृ.	वारिणा	वारिभ्याम्	वारिभिः
च.	वारिणे	वारिभ्याम्	वारिभ्यः
पं.	वारिणः	वारिभ्याम्	वारिभ्यः

	एकव०	द्विव०	बहुव०
ष	वारिण	वारिणो	वारीणाम्
स	वारिणि	वारिणोः	वारिषु

(वारयति मलमिति वारि=जलम्)

१६१ इकारान्तो नपुंसकलिङ्ग 'अनादि' शब्दः।

n One having no beginning

प्र	अनादि	अनादिनी	अनादीनि
सं	हे अनादे हे अनादि	हे अनादिनी	हे अनादीनि
द्वि	अनादि	अनादिनी	अनादीनि
तृ	अनादिना	अनादिभ्याम्	अनादिभि
च	अनादय अनादिन	अनादिभ्याम्	अनादिभ्य
प	अनाद अनादिन	अनादिभ्याम	अनादिभ्य
ष	अनादे, अनादिन	अनाद्या अनादिना	अनादानाम्
स	अनादौ अनादिनि	अनाद्या, अनादिना	अनादिषु

(नास्ति आदि यस्य तत् अनादि=ब्रह्म)

१६२ इकारान्तो नपुंसकलिङ्ग 'दधि' शब्दः।

n Coagulated milk

प्र	दधि	दधिनी	दधीनि
स	हे दधे हे दधि	हे दधिनी	हे दधीनि
द्वि	दधि	दधिनी	दधीनि
तृ	दध्रा	दधिभ्याम्	दधिभिः
च	दध्न	दधिभ्याम्	दधिभ्यः
प	दध्नः	दधिभ्याम्	दधिभ्य
ष	दध्नः	दध्नोः	दध्नाम्
स	दध्नि, दधनि	दध्नोः	दधिषु

(दधि=घन दुग्धम्)

१६३ इकारान्तो नपुंसकलिङ्गः 'अतिदधि' शब्दः ।

n. More sour than curd.

	एकव॰	द्विव॰	बहुव॰
प्र.	अतिदधि	अतिदधिनी	अतिदधीनि
स.	हे अतिदधे, हे अतिदधि	हे अतिदधिनी	हे अतिदधीनि
द्वि.	अतिदधि	अतिदधिनी	अतिदधीनि
तृ	अतिदध्ना	अतिदधिभ्याम्	अतिदधिभिः
च	अतिदध्ने	अतिदधिभ्याम्	अतिदधिभ्यः
प.	अतिदध्नः	अतिदधिभ्याम्	अतिदधिभ्यः
ष	अतिदध्नः	अतिदध्नोः	अतिदध्नाम्
स.	अतिदध्नि, अतिदधनि	अतिदध्नोः	अतिदधिषु

(दधि अतिक्रान्तमिति अतिदधि = दधितोऽप्यम्लम्).

१६४ इकारान्तो नपुंसकलिङ्गः 'अस्थि' शब्दः ।

n. A bone.

प्र	अस्थि	अस्थिनी	अस्थीनि
स	हे अस्थे, हे अस्थि	हे अस्थिनी	हे अस्थीनि
द्वि.	अस्थि	अस्थिनी	अस्थीनि
तृ	अस्थ्ना	अस्थिभ्याम्	अस्थिभिः
च	अस्थ्ने	अस्थिभ्याम्	अस्थिभ्यः
प	अस्थ्नः	अस्थिभ्याम्	अस्थिभ्यः
ष.	अस्थ्नः	अस्थ्नोः	अस्थ्नाम्
स.	अस्थ्नि, अस्थनि	अस्थ्नोः	अस्थिषु

(अस्थि = कीकसम्).

१६५ इकारान्तो नपुंसकलिङ्गः 'सक्थि' शब्दः ।

n A thigh.

प्र.	सक्थि	सक्थिनी	सक्थीनि
स.	हे सक्थे, हे सक्थि	हे सक्थिनी	हे सक्थीनि

	एकव०	द्विव०	बहुव०
द्वि.	सक्थि	सक्थिनी	सक्थीनि
तृ.	सक्थ्ना	सक्थिभ्याम्	सक्थिभि.
च.	सक्थ्ने	सक्थिभ्याम्	सक्थिभ्यः
प.	सक्थ्नः	सक्थिभ्याम्	सक्थिभ्यः
ष.	सक्थ्नः	सक्थ्नोः	सक्थ्नाम्
स.	सक्थ्नि, सक्थनि	सक्थ्नोः	सक्थिषु

(सक्थि = ऊरुः).

१६६ इकारान्तो नपुंसकलिङ्गः 'अक्षि' शब्दः।

n. An eye.

प्र.	अक्षि	अक्षिणी	अक्षीणि
स	हे अक्षे, हे अक्षि	हे अक्षिणी	हे अक्षीणि
द्वि	अक्षि	अक्षिणी	अक्षीणि
तृ.	अक्ष्णा	अक्षिभ्याम्	अक्षिभिः
च	अक्ष्णे	अक्षिभ्याम्	अक्षिभ्य
प.	अक्ष्णः	अक्षिभ्याम्	अक्षिभ्य
ष	अक्ष्णः	अक्ष्णोः	अक्ष्णाम्
स	अक्ष्णि, अक्षणि	अक्ष्णोः	अक्षिषु

(अक्ष्णोति व्याप्नोति पदार्थानिति अक्षि = नेत्रम्).

१६७ ईकारान्तो नपुंसकलिङ्गः 'सुधी' शब्दः।

n. One having good intelligence.

प्र.	सुधि	सुधिनी	सुधीनि
स	हे सुधे, हे सुधि	हे सुधिनी	हे सुधीनि
द्वि	सुधि	सुधिनी	सुधीनि
तृ	सुधिना, सुधिया	सुधिभ्याम्	सुधिभिः

१ 'श्रीपा' शब्दस्थटिप्पणिर्द्रष्टव्या।

	एकव०	द्विव०	बहुव०
च.	सुधिने, सुधिये	सुधिभ्याम्	सुधिभ्यः
पं.	सुधिनः, सुधियः	सुधिभ्याम्	सुधिभ्यः
ष.	सुधिनः, सुधियः	सुधिनोः, सुधियोः	सुधीनाम्, सुधियाम्
स.	सुधिनि, सुधियि	सुधिनोः, सुधियोः	सुधिषु

(सुष्ठु धीर्यस्य तत् सुधि = बुद्धिमत्).

१६८ ईकारान्तो नपुंसकलिङ्गः 'प्रधी' शब्दः ।

n. One having great intelligence.

प्र.	प्रधि	प्रधिनी	प्रधीनि
स.	हे प्रधे, हे प्रधि	हे प्रधिनी	हे प्रधीनि
द्वि	प्रधि	प्रधिनी	प्रधीनि
तृ	प्रधिना, प्रध्या	प्रधिभ्याम्	प्रधिभिः
च.	प्रधिने, प्रध्ये	प्रधिभ्याम्	प्रधिभ्यः
प.	प्रधिनः, प्रध्यः	प्रधिभ्याम्	प्रधिभ्यः
ष.	प्रधिनः, प्रध्यः	प्रधिनोः, प्रध्योः	प्रधीनाम्, प्रध्याम्
स.	प्रधिनि, प्रध्यि	प्रधिनोः, प्रध्योः	प्रधिषु

(प्रकृष्टं ध्यायति इति प्रधि = सुध्यातृ).

एवं—धयी.

१६९ उकारान्तो नपुंसकलिङ्गो 'मधु' शब्दः ।

n. Honey, wine.

प्र.	मधु	मधुनी	मधूनि
स.	हे मधो, हे मधु	हे मधुनी	हे मधूनि

	एकव०	द्वि०	बहुव०
द्वि	मधु	मधुनी	मधूनि
तृ	मधुना	मधुभ्याम	मधुभि
च	मधुने	मधभ्याम	मधुभ्य
प	मधुन	मधभ्याम	मधुभ्य
ष	मधुन	मधना	मधूनाम्
स	मधुनि	मधुना	मधुषु

(मधु = मकरन्द मद्यम्, क्षौद्रम्)

एव–जतु, त्रपु रघु, गुरु, बहु, पृथु चित्रगु,

१७० उकारान्तो नपुसकलिङ्ग 'अम्बु' शब्द'।

n Water

प्र	अम्बु	अम्बुनी	अम्बूनि
स	{ हे अम्बो हे अम्बु	हे अम्बुनी	हे अम्बूनि
द्वि	अम्बु	अम्बुनी	अम्बूनि
तृ	अम्बुना	अम्बुभ्याम्	अम्बुभि
च	अम्बुने	अम्बुभ्याम	अम्बुभ्य
प	अम्बुन	अम्बुभ्याम	अम्बुभ्य
ष	अम्बुन	अम्बुना	अम्बूनाम्
स	अम्बुनि	अम्बुना	अम्बुषु

(अम्बति गच्छति इति अम्बु – जलम्)

१७१ उकारान्तो नपुसकलिङ्ग पीलु' शब्दः।

n A fruit

प्र	पीलु	पीलुनी	पीलूनि
स	{ हे पीलु हे पीलो	हे पीलनी	हे पीलूनि
द्वि	पीलु	पील्नी	पीलूनि
तृ	पीलुना	पालुभ्याम्	पीलुभि
च	पीलुने	पीलुभ्याम	पीलुभ्य
प	पीलुन	पीलुभ्याम्	पीलुभ्यः

	एकव०	द्विव०	बहुव०
ष.	पीलुनः	पीलुनोः	पीलूनाम्
स.	पीलुनि	पीलुनोः	पीलुषु

(पीलु = पीलुवृक्षफलम्).

एवं—शेलु.

१७२ उकारान्तो नपुंसकलिङ्गः 'सानु' शब्दः ।

n. A summit.

प्र.	सानु	सानुनी	सानूनि
सं.	हे सानो, हे सानु	हे सानुनी	हे सानूनि
द्वि.	सानु	सानुनी	सानूनि, स्नूनि
तृ	सानुना, स्नुना	सानुभ्याम्, स्नुभ्याम्	सानुभिः, स्नुभिः
च.	सानुने, स्नुने	सानुभ्याम्, स्नुभ्याम्	सानुभ्यः, स्नुभ्यः
प	सानुनः, स्नुनः	सानुभ्याम्, स्नुभ्याम्	सानुभ्यः, स्नुभ्यः
ष.	सानुनः, स्नुनः	सानुनोः, स्नुनोः	सानूनाम्, स्नूनाम्
स.	सानुनि, स्नुनि	सानुनोः, स्नुनोः	सानुषु, स्नुषु

(सानु = पर्वतशिखरम्).

१७३ उकारान्तो नपुंसकलिङ्गः 'प्रियक्रोष्टु' शब्दः ।

n. A pet jackal.

प्र.	प्रियक्रोष्टु	प्रियक्रोष्टुनी	प्रियक्रोष्टूनि
सं.	हे प्रियक्रोष्टो, हे प्रियक्रोष्टु	हे प्रियक्रोष्टुनी	हे प्रियक्रोष्टूनि
द्वि.	प्रियक्रोष्टु	प्रियक्रोष्टुनी	प्रियक्रोष्टूनि
तृ	प्रियक्रोष्टुना, प्रियक्रोष्ट्रा	प्रियक्रोष्टुभ्याम्	प्रियक्रोष्टुभिः

	एकव०	द्विव०	बहुव०
च.	प्रियक्रोष्टुने, प्रियक्रोष्ट्वे, प्रियक्रोष्टवे	प्रियक्रोष्टुभ्याम्	प्रियक्रोष्टुभ्यः
पं.	प्रियक्रोष्टुनः, प्रियक्रोष्ट्वः, प्रियक्रोष्टोः	प्रियक्रोष्टुभ्याम्	प्रियक्रोष्टुभ्यः
ष.	प्रियक्रोष्टुनः, प्रियक्रोष्ट्वः, प्रियक्रोष्टोः	प्रियक्रोष्टुनोः, प्रियक्रोष्ट्वोः, प्रियक्रोष्ट्रोः	प्रियक्रोष्टूनाम्
स	प्रियक्रोष्टुनि, प्रियक्रोष्टरि, प्रियक्रोष्टौ	प्रियक्रोष्टुनोः, प्रियक्रोष्ट्वोः, प्रियक्रोष्ट्रोः	प्रियक्रोष्टुषु

(प्रियाः क्रोष्टारः यस्य तत् प्रियक्रोष्टु = प्रियजम्बूकम्).

१७४ उकारान्तो नपुसकलिङ्गः 'सुलु' शब्दः ।

n. One who cuts well.

प्र	सुलु	सुलुनी	सुलूनि
स	हे सुलो, हे सुलु	हे सुलुनी	हे सुलूनि
द्वि.	सुलु	सुलुनी	सुलूनि
तृ	सुलुना, सुल्वा	सुलुभ्याम्	सुलुभिः
च.	सुलुने, सुल्वे	सुलुभ्याम्	सुलुभ्यः
पं	सुलुन, सुल्वः	सुलुभ्याम्	सुलुभ्यः
ष	सुलुन, सुल्वः	सुलुनोः, सुल्वोः	सुलूनाम्, सुल्वाम्
स.	सुलुनि, सुल्वि	सुलुनोः, सुल्वोः	सुलुषु

(सुष्ठु लुनाति इति सुलु = सुच्छेदकं शस्त्रम्).

१७५ ऋकारान्तो नपुंसकलिङ्गः 'धातृ' शब्दः।

n. One who supports.

	एकव०	द्विव०	बहुव०
प्र.	धातृ	धातृणी	धातॄणि
सं.	हे धातः, हे धातृ	हे धातृणी	हे धातॄणि
द्वि.	धातृ	धातृणी	धातॄणि
तृ.	धातृणा, धात्रा	धातृभ्याम्	धातृभिः
च.	धातृणे, धात्रे	धातृभ्याम्	धातृभ्यः
पं.	धातृणः, धातुः	धातृभ्याम्	धातृभ्यः
ष	धातृणः, धातुः	धातृणोः, धात्रोः	धातॄणाम्
स.	धातृणि, धातरि	धातृणोः, धात्रोः	धातृषु

(दधाति इति धातृ = धारकम्).

एवं-मन्तृ, ध्यातृ, गन्तृ, वक्तृ, श्रोतृ, पातृ, इत्यादयः।

१७६ ऋकारान्तो नपुंसकलिङ्गः 'ज्ञातृ' शब्दः।

n. One who knows.

प्र	ज्ञातृ	ज्ञातृणी	ज्ञातॄणि
सं	हे ज्ञातृ, हे ज्ञातः	हे ज्ञातृणी	हे ज्ञातॄणि
द्वि.	ज्ञातृ	ज्ञातृणी	ज्ञातॄणि
तृ	ज्ञातृणा, ज्ञात्रा	ज्ञातृभ्याम्	ज्ञातृभिः
च.	ज्ञातृणे, ज्ञात्रे	ज्ञातृभ्याम्	ज्ञातृभ्यः
पं.	ज्ञातृणः, ज्ञातुः	ज्ञातृभ्याम्	ज्ञातृभ्यः
ष.	ज्ञातृणः, ज्ञातुः	ज्ञातृणोः, ज्ञात्रोः	ज्ञातॄणाम्

एकव०	द्विव०	बहुव०
स. { ज्ञातृणि, ज्ञातरि	{ ज्ञातृणोः, ज्ञात्रोः	ज्ञातृषु

(जानाति इति ज्ञातृ = ज्ञानि).

एव-वेतृ.

१७७ ऋकारान्तो नपुंसकलिङ्गः 'कर्तृ' शब्दः ।

n. One who does.

प्र. कर्तृ	कर्तृणी	कर्तृणि
स { हे कर्तृ, हे कर्तः	हे कर्तृणी	हे कर्तृणि
द्वि. कर्तृ	कर्तृणी	कर्तृणि
तृ. { कर्तृणा, कर्त्रा	कर्तृभ्याम्	कर्तृभिः
च. { कर्तृणे, कर्त्रे	कर्तृभ्याम्	कर्तृभ्यः
प { कर्तृणः, कर्तुः	कर्तृभ्याम्	कर्तृभ्यः
ष { कर्तृणः, कर्तुः	{ कर्तृणोः, कर्त्रोः	कर्तृणाम्
स. { कर्तृणि, कर्तरि	{ कर्तृणोः, कर्त्रोः	कर्तृषु

(करोति इति कर्तृ = कारकम्).

एवं-मर्तृ, हर्तृ.

१७८ ओकारान्तो* नपुंसकलिङ्गः 'प्रद्यो' शब्दः ।

n. A fair day.

प्र. प्रद्यु	प्रद्युनी	प्रद्यूनि
सं. { हे प्रद्यु, हे प्रद्यो	हे प्रद्युनी	हे प्रद्यूनि
द्वि. प्रद्यु	प्रद्युनी	प्रद्यूनि

* 'श्रीपा' शब्दस्थटिप्पणिर्द्रष्टव्या ।

	एकव०	द्विव०	बहुव०
तृ.	प्रद्युना	प्रद्युभ्याम्	प्रद्युभिः
च.	प्रद्युने *	प्रद्युभ्याम्	प्रद्युभ्यः
पं.	प्रद्युनः	प्रद्युभ्याम्	प्रद्युभ्यः
ष.	प्रद्युनः	प्रद्युनोः	प्रद्युनाम्
स.	प्रद्युनि	प्रद्युनोः	प्रद्युषु

(प्रकृष्टा द्यौः यस्मिन् तत् प्रद्यु = निरभ्रं दिनम्).

एवं–सुद्यो, विमलद्यो,

१७९ ऐकारान्तो नपुंसकलिङ्गः 'प्रै' शब्दः ।

n. Wealthy.

प्र.	प्ररि	प्ररिणी	प्ररीणि
सं.	{ हे प्ररि, हे प्रै	हे प्ररिणी	हे प्ररीणि
द्वि.	प्ररि	प्ररिणी	प्ररीणि
तृ.	प्ररिणा	प्रराभ्याम्	प्रराभिः
च.	प्ररिणे	प्रराभ्याम्	प्रराभ्यः
पं.	प्ररिणः	प्रराभ्याम्	प्रराभ्यः
ष.	प्ररिणः	प्ररिणोः	{ प्ररीणाम्, प्रराणाम्
स.	प्ररिणि	प्ररिणोः	प्ररासु

(प्रकृष्टः राः धनं यस्मिन् तत् प्ररि = धनाढ्यम्).

१८० औकारान्तो नपुंसकलिङ्गः 'सुनौ' शब्दः ।

n. Water in which there is a good ship.

प्र.	सुनु	सुनुनी	सुनूनि
स	{ हे सुनु, हे सुनो	हे सुनुनी	हे सुनूनि
द्वि.	सुनु	सुनुनी	सुनूनि
तृ.	सुनुना	सुनुभ्याम्	सुनुभिः
च	सुनुने	सुनुभ्याम्	सुनुभ्यः

* अत्र 'प्रद्यवे', 'प्रद्यो' इत्यादीनि पुंवत् रूपाणि न भवन्ति, एवं सर्वत्र 'ए, ऐ, ओ, औ' कारान्तेषु नपुंसकलिङ्गेषु शब्देषु बोध्यम् ।

	एकव०	द्विव०	बहुव०
पं.	सुनुनः	सुनुभ्याम्	सुनुभ्यः
ष.	सुनुनः	सुनुनोः	सुनूनाम्
स	सुनुनि	सुनुनोः	सुनुषु

(शोभना नौः यस्मिन् तत् सुनु = जलम्).

एव—सुग्लु.

इत्यजन्तनपुंसकलिङ्गाशब्दाः ।

CHAPTER V.

(2) Consonantal Bases.

पुंलिङ्ग and स्त्रीलिङ्ग

Terminations.

प्र.	स्	औ	अस्
स	„	„	„
द्वि.	अम्	„	„
तृ.	आ	भ्याम्	भिस्
च	ए	„	भ्यस्
प.	अस्	„	„
ष	„	ओस्	आम्
स.	इ	„	सु

नपुंसकलिंग.

प्र	—	ई	इ
स	—	„	„
द्वि.	—	„	„

The rest like the above.

अथ हलन्तशब्दाः ।

१८१ हकारान्तः पुँल्लिङ्गो 'लिह्' शब्दः ।

m. Licking.

प्र.	लिट्, लिड्	लिहौ	लिहः

एकव०	द्विव०	बहुव०
स. { हे लिट्, हे लिड्	हे लिहौ	हे लिहः
द्वि. लिहम्	लिहौ	लिहः
तृ. लिहा	लिड्भ्याम्	लिड्भिः
च. लिहे	लिड्भ्याम्	लिड्भ्यः
प. लिहः	लिड्भ्याम्	लिड्भ्यः
ष लिहः	लिहोः	लिहाम्
स. लिहि	लिहोः	{ लिट्त्सु, लिट्सु

(लेढि आस्वादयति इति = लिट्).

एव–मधुलिह्, दामलिह्, प्रभृतयः ।

१८२ हकारान्तः पुँलिङ्गो 'दुह्' शब्दः ।

m. Milking.

प्र. { धुक्, धुग्	दुहौ	दुह
सं { हे धुक्, हे धुग्	हे दुहौ	हे दुहः
द्वि दुहम्	दुहौ	दुहः
तृ दुहा	धुग्भ्याम्	धुग्भिः
च. दुह	धुग्भ्याम्	धुग्भ्यः
प दुहः	धुग्भ्याम्	धुग्भ्य.
ष. दुहः	दुहोः	दुहाम्
स. दुहि	दुहोः	धुक्षु

(दोग्धि इति = धुक्).

एवं–गोदुह्.

१८३ हकारान्तः पुँलिङ्गो 'द्रुह्' शब्दः ।

m. Hating.

{ ध्रुक्, ध्रुग्; ध्रुट्, ध्रुड्	द्रुहौ	द्रुहः

	एकव.	द्विव	बहुव
स	हेध्रुक् हेध्रुग हेध्रुट हेध्रुड्	हे द्रुहौ	हे द्रुहः
द्वि	द्रुहम	द्रुहौ	द्रुह
तृ	द्रुहा	ध्रुग्भ्याम् ध्रुड्भ्याम	ध्रुग्भिः, ध्रुड्भि
च	द्रुहे	ध्रुग्भ्याम, ध्रुड्भ्याम्	ध्रुग्भ्यः, ध्रुड्भ्यः
प	द्रुह	ध्रुग्भ्याम ध्रुड्भ्याम्	ध्रुग्भ्य ध्रुड्भ्यः
ष	द्रुह	द्रुहो	द्रुहाम्
स	द्रुहि	द्रुहो	ध्रुक्ष ध्रुट्त्सु ध्रुट्सु

(द्रोग्धि इति=ध्रुक् ध्रुट्)

---

१८४ हकारान्त. पुँल्लिङ्गी 'मुह' शब्द ।

m Fainting

प्र	मुक् मुग्, मुट मुड्	मुहौ	मुह
स	हे मुक हे मुग हे मुट् हे मुड्	हे मुहौ	हे मुह
द्वि	मुहम्	मुहौ	मुह
तृ	मुहा	मुग्भ्याम् मुड्भ्याम्	मग्भिः मुड्भि
च	मुहे	मुग्भ्याम मुड्भ्याम्	मुग्भ्यः, मुड्भ्यः
प	मुह	मुग्भ्याम्, मुड्भ्याम्	मुग्भ्य , मुड्भ्यः
ष	मुहः	मुहो	मुहाम्
स	मुहि	मुहो	मुक्षु मुट्त्सु, मुट्सु

(मुह्यति इति=मुक्, मुट्)

१८५ हकारान्तः पुँल्लिङ्गः 'स्नुह्' शब्दः ।

m. One belching.

	एकव०	द्विव०	बहुव०
प्र	स्नुक्,-ग्, स्नुट्,-ड्	स्नुहौ	स्नुहः
स.	हे स्नुक् ग्, हे स्नुट्,-ड्	हे स्नुहौ	हे स्नुहः
द्वि	स्नुहम्	स्नुहौ	स्नुहः
तृ	स्नुहा	स्नुग्भ्याम्, स्नुड्भ्याम्	स्नुग्भिः, स्नुड्भिः
च	स्नुहे	,, ,,	स्नुग्भ्यः, स्नुड्भ्यः
प.	स्नुहः	,, ,,	,, ,,
ष	,,	स्नुहोः	स्नुहाम्
स	स्नुहि	,,	स्नुक्षु, स्नुट्त्सु, स्नुट्सु

(स्नुह्यति उद्गिरति इति स्नुक्, स्नुट्=उदानवायूद्गिरणकर्ता)

---

१८६ हकारान्तः पुँल्लिङ्गः 'स्निह्' शब्दः ।

m Friend

प्र	स्निक्,-ग्, स्निट्,-ड्	स्निहौ	स्निहः
स	हे स्निक्,-ग् हे स्निट्,-ड्	हे स्निहौ	हे स्निहः
द्वि	स्निहम्	स्निहौ	स्निहः
तृ	स्निहा	स्निग्भ्याम् स्निड्भ्याम्	स्निग्भिः, स्निड्भिः
च	स्निहे	,, ,,	स्निग्भ्यः, स्निड्भ्यः
प.	स्निहः	,, ,,	,, ,,
ष.	स्निहः	स्निहोः	स्निहाम्

	एकव०	द्विव०	बहुव०
स	स्निहि	स्निहोः	स्निक्षु, स्निट्त्सु, स्निट्सु

(स्निह्यति प्रीणाति इति स्निक्, स्निट्=मित्रम्).

१८७ हकारान्तः पुँल्लिङ्गो 'विश्ववाह्' शब्दः ।

m. The sustainer of the universe.

प्र.	विश्ववाट्,-ड्	विश्ववाहौ	विश्ववाहः
सं.	हे विश्ववाट्,-ड्	हे विश्ववाहौ	हे विश्ववाहः
द्वि.	विश्ववाहम्	विश्ववाहौ	विश्वौहः
तृ.	विश्वौहा	विश्ववाड्भ्याम्	विश्ववाड्भिः
च.	विश्वौहे	,,	विश्ववाड्भ्यः
पं.	विश्वौहः	,,	,,
ष.	,,	विश्वौहोः	विश्वौहाम्
स.	विश्वौहि	,,	विश्ववाट्त्सु, विश्ववाट्सु

(विश्वं वहति इति विश्ववाट्=विश्वम्भरः).

एवं—प्रष्ठवाह्

१८८ हकारान्तः पुँल्लिङ्गः 'अनडुह्' शब्दः ।

m. An ox.

प्र	अनड्वान्	अनड्वाहौ	अनड्वाहः
स	हे अनड्वन्	हे अनड्वाहौ	हे अनड्वाहः
द्वि	अनड्वाहम्	अनड्वाहौ	अनडुहः
तृ	अनडुहा	अनडुद्भ्याम्	अनडुद्भिः
च	अनडुहे	,,	अनडुद्भ्यः
प	अनडुहः	,,	,,
ष	,,	अनडुहोः	अनडुहाम्
स	अनडुहि	,,	अनडुत्सु

(अनः शकटं वहति इति अनड्वान्=वृषभः).

१८९ हकारान्तः पुँल्लिङ्गः 'तुरासाह्' शब्दः।

m. A name of Indra.

प्र	तुराषाट्, तुराषाड्	तुरासाहौ	तुरासाहः

	एकव.	द्विव	बहुव
सं.	हे तुराषाट्,-ड्	हे तुरासाहौ	हे तुरासाहः
द्वि.	तुरासाहम्	तुरासाहौ	तुरासाहः
तृ.	तुरासाहा	तुराषाड्भ्याम्	तुराषाड्भिः
च.	तुरासाहे	,,	तुराषाड्भ्यः
पं.	तुरासाहः	,,	,,
ष.	,,	तुरासाहोः	तुरासाहाम्
स.	तुरासाहि	,,	तुराषाट्त्सु, तुराषाट्सु

(तुर वेगं सहत इति तुराषाट्=इन्द्रः).

१९० हकारान्तः पुँल्लिङ्गः 'सुदिव्' शब्दः ।

m. A fair-day-sky.

प्र.	सुद्यौः	सुदिवौ	सुदिवः
सं.	हे सुद्यौः	हे सुदिवौ	हे सुदिवः
द्वि	सुदिवम्	सुदिवौ	सुदिवः
तृ	सुदिवा	सुद्युभ्याम्	सुद्युभिः
च.	सुदिवे	,,	सुद्युभ्यः
पं.	सुदिवः	,,	,,
ष.	,,	सुदिवोः	सुदिवाम्
स.	सुदिवि	,,	सुद्युषु

(शोभना द्यौः यस्मिन् सः सुद्यौः=निरभ्रो दिवसः).

१९१ रेफान्तः पुँल्लिङ्गः 'चतुर्' शब्दः बहुवचनान्तः । तथैव 'परमचतुर्' शब्दः ।

m Four.

	'चतुर्'	'परमचतुर्'
	बहुव०	बहुव०
प्र.	चत्वारः	परमचत्वारः
सं.	हे चत्वारः	हे परमचत्वारः
द्वि	चतुरः	परमचतुरः
तृ	चतुर्भिः	परमचतुर्भिः

	बहुव०	बहुव०
च.	चतुर्भ्यः	परमचतुर्भ्यः
प.	,,	,,
ष.	चतुर्णाम्	परमचतुर्णाम्
स.	चतुर्षु	परमचतुर्षु

१९२ रेफान्तः पुँल्लिङ्गः 'प्रियचतुर्' शब्दः ।

m. One who likes four.

	एकव०	द्विव०	बहुव०
प्र.	प्रियचत्वाः	प्रियचत्वारौ	प्रियचत्वारः
स.	हे प्रियचत्वः	हे प्रियचत्वारौ	हे प्रियचत्वारः
द्वि	प्रियचत्वारम्	प्रियचत्वारौ	प्रियचतुरः
तृ.	प्रियचतुरा	प्रियचतुर्भ्याम्	प्रियचतुर्भिः
च.	प्रियचतुरे	,,	प्रियचतुर्भ्यः
प.	प्रियचतुरः	,,	,,
ष.	,,	प्रियचतुरोः	प्रियचतुराम्
स.	प्रियचतुरि	,,	प्रियचतुर्षु

(प्रियाःचत्वारःयस्य सःप्रियचत्वाः=प्रियचतुःसंख्यः).

१९३ लकारान्तः पुँल्लिङ्गः 'कमल्' शब्दः ।

m. Longing for wealth or a lotus.

प्र.	कमल्	कमलौ	कमलः
स.	हे कमल्	हे कमलौ	हे कमलः
द्वि.	कमलम्	कमलौ	कमलः
तृ.	कमला	कमल्भ्याम्	कमल्भिः
च.	कमले	,,	कमल्भ्यः
प.	कमलः	,,	,,
ष.	,,	कमलोः	कमलाम्
स.	कमलि	,,	कमल्षु

(कमलं, कमलां वा आचष्टे 'इदमियं वा मे स्यात् इति' इति कमल्= कमलेच्छुः).

१९४ मकारान्तः पुँल्लिङ्गः 'प्रशाम्' शब्दः ।

m. Calm.

	एकव०	द्विव०	बहुव०
प्र.	प्रशान्	प्रशामौ	प्रशामः
सं.	हे प्रशान्	हे प्रशामौ	हे प्रशामः
द्वि.	प्रशामम्	प्रशामौ	प्रशामः
तृ.	प्रशामा	प्रशान्भ्याम्	प्रशान्भिः
च.	प्रशामे	,,	प्रशान्भ्यः
पं.	प्रशामः	,,	,,
ष.	,,	प्रशामोः	प्रशामाम्
स.	प्रशामि	,,	प्रशान्सु

(प्रशाम्यति इति प्रशान्=शान्त.).

१९५ मकारान्तः पुँल्लिङ्गः 'किम्' शब्दः ।

m. Who, which, what.

प्र	कः	कौ	के
द्वि	कम्	,,	कान्
तृ.	केन	काभ्याम्	कैः
च.	कस्मै	,,	केभ्यः
प.	कस्मात्	,,	,,
ष.	कस्य	कयोः	केषाम्
स.	कस्मिन्	,,	केषु

[त्यदादीनां सर्वनामशब्दानां सम्बोधनं नास्ति इत्युत्सर्गः].

(कः=अनिश्चितनामा:)

१९६ मकारान्तः पुँल्लिङ्गः 'इदम्'[1] शब्दः

m. This.

प्र.	अयम्	इमौ	इमे
द्वि.	{ इमम्, एनम्	{ इमौ, एनौ	{ इमान्, एनान्

१ "अदसस्तु विप्रकृष्टे तदिति परोक्षे विजानीयात् इदमस्तु ॥" सन्निकृष्टे समीपतरवर्ति चैतदो रूपम् ।

	एकव०	द्विव०	बहुव०
तृ.	अनेन, एनेन	आभ्याम्	एभिः
च.	अस्मै	,,	एभ्यः
पं.	अस्मात्	,,	,,
ष.	अस्य	अनयोः, एनयोः	एषाम्
स	अस्मिन्	,, ,,	एषु

(अयम्=अङ्गुल्या निर्दिष्टः)

१९७ मकारान्तःतद्धिताकच्प्रत्ययविशिष्टः'इदकम्'शब्दः।

m. This.

प्र	अयकम्	इमकौ	इमके
द्वि.	इमकम्	,,	इमकान्
तृ	इमकेन	इमकाभ्याम्	इमकैः
च	इमकस्मै	,,	इमकेभ्यः
प.	इमकस्मात्	,,	,,
ष	इमकस्य	इमकयोः	इमकेषाम्
स.	इमकस्मिन्	,,	इमकेषु

(अयकम्=अङ्गुल्या निर्दिष्ट एव)

१९८ णकारान्तः पुंलिङ्गः ' सुगण् ' शब्दः

m. One count ng well, a good astrologer.

प्र.	सुगण्	सुगणौ	सुगणः
स.	हे सुगण्	हे सुगणौ	हे सुगणः
द्वि.	सुगणम्	सुगणौ	सुगणः
तृ.	सुगणा	सुगण्भ्याम्	सुगण्भिः
च.	सुगणे	,,	सुगण्भ्यः
पं.	सुगणः	,,	,,
ष	,,	सुगणोः	सुगणाम्
स.	सुगणि	,,	सुगण्ट्सु, सुगण्ट्सु, सुगण्सु

(सुष्ठु गणयति इति सुगण्=निपुणो गणकः).

१९९ णकारान्तः पुँल्लिङ्गः 'सुगाण्' शब्दः

m One counting well.

	एकव०	द्विव०	बहुव०
प्र.	सुगाण्	सुगाणौ	सुगाणः
स	हे सुगाण्	हे सुगाणौ	हे सुगाणः
द्वि	सुगाणम्	सुगाणौ	सुगाणः
तृ.	सुगाणा	सुगाण्भ्याम्	सुगाण्भिः
च	सुगाणे	,,	सुगाण्भ्यः
प	सुगाणः	,,	,,
ष	,,	सुगाणोः	सुगाणाम्
स.	सुगाणि	,,	सुगाण्ट्सु, सुगाण्ट्सु, सुगाण्सु

(सुष्ठु गणयति इति सुगाण्=निपुणो गणक एव)

२०० नकारान्तः पुँल्लिङ्गः 'राजन्' शब्दः ।

m. A king

प्र	राजा	राजानौ	राजानः
स.	हे राजन्	हे राजानौ	हे राजानः
द्वि.	राजानम्	राजानौ	राज्ञः
तृ.	राज्ञा	राजभ्याम्	राजभिः
च.	राज्ञे	,,	राजभ्यः
प.	राज्ञः	,,	,,
ष.	,,	राज्ञोः	राज्ञाम्
स.	राज्ञि, राजनि	,,	राजसु

(राजते शोभते असौ राजा=भूपतिः).

२०१ नकारान्तः पुँल्लिङ्गः 'प्रतिदिवन्' शब्दः ।

m Expert in gambling with dice.

प्र.	प्रतिदिवा	प्रतिदिवानौ	प्रतिदिवानः
स	हे प्रतिदिवन्	हे प्रतिदिवानौ	हे प्रतिदिवानः
द्वि.	प्रतिदिवानम्	प्रतिदिवानौ	प्रतिदीव्नः

	एकव०	द्विव०	बहुव०
तृ.	प्रतिदीव्ना	प्रतिदिवभ्याम्	प्रतिदिवभिः
च.	प्रतिदीव्ने	,,	प्रतिदिवभ्यः
प.	प्रतिदीव्नः	,,	,,
ष.	,,	प्रतिदीव्नोः	प्रतिदीव्नाम्
स.	प्रतिदीव्नि, प्रतिदीवनि	प्रतिदीव्नोः	प्रतिदिवसु

(प्रतिदीव्यति अक्षैः प्रतिक्रीडति इति प्रतिदिवा=अक्षद्यूते विजेता).

२०२ नकारान्तः पुंल्लिङ्गो 'यज्वन्' शब्दः ।

m. A sacrificer.

प्र.	यज्वा	यज्वानौ	यज्वानः
सं	हे यज्वन्	हे यज्वानौ	हे यज्वानः
द्वि	यज्वानम्	यज्वानौ	यज्वनः
तृ	यज्वना	यज्वभ्याम्	यज्वभिः
च.	यज्वने	,,	यज्वभ्यः
पं.	यज्वनः	,,	,,
ष.	,,	यज्वनोः	यज्वनाम्
स.	यज्वनि	,,	यज्वसु

(यजति विधिना इति यज्वा=विधिवत् यज्ञकर्ता).

एवं सुत्वन्, यक्ष्मन्, पाप्मन्, आत्मन् प्रभृतयः ।

२०३ नकारान्तः पुँल्लिङ्गो 'ब्रह्मन्' शब्दः ।

m. The Supreme being, creator.

प्र.	ब्रह्मा	ब्रह्माणौ	ब्रह्माणः
सं.	हे ब्रह्मन्	हे ब्रह्माणौ	हे ब्रह्माणः
द्वि.	ब्रह्माणम्	ब्रह्माणौ	ब्रह्मणः
तृ.	ब्रह्मणा	ब्रह्मभ्याम्	ब्रह्मभिः
च.	ब्रह्मणे	,,	ब्रह्मभ्यः
प.	ब्रह्मणः	,,	,,
ष.	,,	ब्रह्मणोः	ब्रह्मणाम्
स.	ब्रह्मणि	,,	ब्रह्मसु

(बृंहयति वर्धयति सृष्टिम् इति ब्रह्मा=सृष्टिकर्ता).

२०४ नकारान्तः पुँल्लिङ्गो 'वृत्रहन्' शब्दः।

m. A name of Indra.

	एकव॰	द्विव॰	बहुव॰
प्र.	वृत्रहा	वृत्रहणौ	वृत्रहणः
सं	हे वृत्रहन्	हे वृत्रहणौ	हे वृत्रहणः
द्वि.	वृत्रहणम्	वृत्रहणौ	वृत्रघ्नः
तृ.	वृत्रघ्ना	वृत्रहभ्याम्	वृत्रहभिः
च.	वृत्रघ्ने	,,	वृत्रहभ्यः
पं.	वृत्रघ्नः	,,	,,
ष.	,,	वृत्रघ्नोः	वृत्रघ्नाम्
स.	वृत्रघ्नि, वृत्रहणि	,,	वृत्रहसु

(वृत्रं हन्ति इति वृत्रहा=इन्द्रः).

एवं–ब्रह्महन्, भ्रूणहन्, शत्रुहन्, पापहन्, प्रभृतयः।

२०५ नकारान्तः (इन्नन्तः) पुँल्लिङ्गः 'शार्ङ्गिन्' शब्दः।

m. An archer, Vishnu.

प्र.	शार्ङ्गी	शार्ङ्गिणौ	शार्ङ्गिणः
सं.	हे शार्ङ्गिन्	हे शार्ङ्गिणौ	हे शार्ङ्गिणः
द्वि	शार्ङ्गिणम्	शार्ङ्गिणौ	शार्ङ्गिणः
तृ.	शार्ङ्गिणा	शार्ङ्गिभ्याम्	शार्ङ्गिभिः
च.	शार्ङ्गिणे	,,	शार्ङ्गिभ्यः
पं.	शार्ङ्गिणः	,,	,,
ष.	,,	शार्ङ्गिणोः	शार्ङ्गिणाम्
स.	शार्ङ्गिणि	,,	शार्ङ्गिषु

(शार्ङ्गं धनुः अस्य अस्ति इति शार्ङ्गी=विष्णुः).

एवं–चक्रिन्, रागिन्, रोषिन्, दोषिन्, द्वेषिन्, करिन्, प्रभृतयः।

२०६ नकारान्तः (इन्नन्तः)पुँल्लिङ्गो 'यशस्विन्' शब्दः।

m. A famous person.

प्र.	यशस्वी	यशस्विनौ	यशस्विनः
सं.	हे यशस्विन्	हे यशस्विनौ	हे यशस्विनः

	एकव०	द्विव०	बहुव०
द्वि.	यशस्विनम्	यशस्विनौ	यशस्विनः
तृ	यशस्विना	यशस्विभ्याम्	यशस्विभिः
च.	यशस्विने	,,	यशस्विभ्यः
पं.	यशस्विनः	,,	,,
ष.	,,	यशस्विनोः	यशस्विनाम्
स.	यशस्विनि	,,	यशस्विषु

(यशः अस्य अस्ति इति यशस्वी=कीर्तिमान्).

एवं–शालिन्, मालिन्, दायिन्, मायिन्, गामिन्, यागिन्, प्रभृतयः।

२०७ नकारान्तः पुँल्लिङ्गः 'अर्यमन्' शब्दः।

m The sun.

प्र.	अर्यमा	अर्यमणौ	अर्यमणः
स.	हे अर्यमन्	हे अर्यमणौ	हे अर्यमणः
द्वि.	अर्यमणम्	अर्यमणौ	अर्यम्णः
तृ.	अर्यम्णा	अर्यमभ्याम्	अर्यमभिः
च	अर्यम्णे	,,	अर्यमभ्यः
प.	अर्यम्णः	,,	,,
ष.	,,	अर्यम्णोः	अर्यम्णाम्
स.	{ अर्यम्णि, अर्यमणि	अर्यम्णो	अर्यमसु

(ऋच्छति, इयर्ति वा प्रतिदिनमाकाशे इति अर्यमा=सूर्यः).

२०८ नकारान्तः पुंल्लिङ्गः 'पूषन्' शब्दः।

m. The sun

प्र.	पूषा	पूषणौ	पूषण
सं.	हे पूषन्	हे पूषणौ	हे पूषणः
द्वि.	पूषणम्	पूषणौ	पूष्णः
तृ.	पूष्णा	पूषभ्याम्	पूषभिः
च.	पूष्णे	,,	पूषभ्यः
पं.	पूष्णः	,,	,,
ष.	,,	पूष्णोः	पूष्णाम्

एकव०	द्विव०	बहुव०
स. { पूष्णि, पूषणि	पूष्णोः	पूषसु

(पुष्णाति प्राणिनः इति पूषा=सूर्यः).

२०९ नकारान्तः पुँल्लिङ्गो 'मघवन्' शब्दः ।

m. A name of Indra.

प्र.	मघवा	मघवानौ	मघवानः
सं.	हे मघवन्	हे मघवानौ	हे मघवानः
द्वि.	मघवानम्	मघवानौ	मघोनः
तृ.	मघोना	मघवभ्याम्	मघवभिः
च.	मघोने	,,	मघवभ्यः
पं.	मघोनः	,,	,,
ष	,,	मघोनोः	मघोनाम्
स.	मघोनि	,,	मघवसु

(मघवा=इन्द्रः)

२१० तकारान्तः पुँल्लिङ्गो 'मघवत्' शब्दः ।

m A name of Indra.

प्र	मघवान्	मघवन्तौ	मघवन्तः
सं	हे मघवन्	हे मघवन्तौ	हे मघवन्तः
द्वि.	मघवन्तम्	मघवन्तौ	मघवतः
तृ.	मघवता	मघवद्भ्याम्	मघवद्भिः
च.	मघवते	,,	मघवद्भ्यः
पं.	मघवतः	,,	,,
ष.	,,	मघवतोः	मघवताम्
स	मघवति	,,	मघवत्सु

(मघवान्=इन्द्र.).

एवं–अघवत्, भगवत्, धीमत्, प्रभृतयः ।

२११ नकारान्तः पुँल्लिङ्गः 'श्वन्' शब्दः ।

m A dog.

प्र.	श्वा	श्वानौ	श्वानः
सं.	हे श्वन्	हे श्वानौ	हे श्वानः

	एकव०	द्विव०	बहुव०
द्वि.	श्वानम्	श्वानौ	शुनः
तृ.	शुना	श्वभ्याम्	श्वभिः
च.	शुने	,,	श्वभ्यः
पं.	शुनः	,,	,,
ष.	,,	शुनोः	शुनाम्
स.	शुनि	,,	श्वसु

(श्वा=कुक्कुरः).

२१२ नकारान्तः पुँल्लिङ्गो 'युवन्' शब्दः।

m A young man.

प्र.	युवा	युवानौ	युवानः
स.	हे युवन्	हे युवानौ	हे युवानः
द्वि	युवानम्	युवानौ	यूनः
तृ.	यूना	युवभ्याम्	युवभिः
च.	यूने	,,	युवभ्यः
प.	यूनः	,,	,,
ष.	,,	यूनोः	यूनाम्
स.	यूनि	,,	युवसु

(यौति मिश्रीभवति स्त्रिया सह इति युवा=तरुणः).

२१३ नकारान्तः पुँल्लिङ्गः 'अर्वन्' शब्दः।

m. A horse.

प्र.	अर्वा	अर्वन्तौ	अर्वन्तः
सं.	हे अर्वन्	हे अर्वन्तौ	हे अर्वन्तः
द्वि.	अर्वन्तम्	अर्वन्तौ	अर्वतः
तृ.	अर्वता	अर्वद्भ्याम्	अर्वद्भिः
च.	अर्वते	,,	अर्वद्भ्यः
पं.	अर्वतः	,,	,,
ष.	,,	अर्वतोः	अर्वताम्
स.	अर्वति	,,	अर्वत्सु

(अर्वा=अश्वः).

२१४ नकारान्तः पुँल्लिङ्गः 'अनर्वन्' शब्दः।

m. A mule.

	एकव०	द्विव०	बहुव०
प्र.	अनर्वा	अनर्वाणौ	अनर्वाणः
स.	हे अनर्वन्	हे अनर्वाणौ	हे अनर्वाणः
द्वि.	अनर्वाणम्	अनर्वाणौ	अनर्वणः
तृ.	अनर्वणा	अनर्वभ्याम्	अनर्वभिः
च.	अनर्वणे	,,	अनर्वभ्यः
प.	अनर्वण.	,,	,,
ष.	,,	अनर्वणोः	अनर्वणाम
स.	अनर्वणि	,,	अनर्वसु

(न अर्वा अनर्वा=अनश्वः).

२१५ नकारान्तः पुँल्लिङ्गः 'पथिन' शब्दः।

m A way.

प्र.	पन्थाः	पन्थानौ	पन्थानः
स.	हे पन्थाः	हे पन्थानौ	हे पन्थानः
द्वि.	पन्थानम्	पन्थानौ	पथः
तृ.	पथा	पथिभ्याम्	पथिभिः
च.	पथे	,,	पथिभ्यः
प.	पथः	,,	,,
ष	,,	पथोः	पथाम्
स.	पथि	,,	पथिषु

(पथ्यते गम्यते अनेन इति पन्थाः=मार्गः).

एवं–मथिन् शब्दः।

२१६ नकारान्तः पुँल्लिङ्गः 'ऋभुक्षिन्' शब्दः।

m Indra.

प्र.	ऋभुक्षाः	ऋभुक्षाणौ	ऋभुक्षाणः
स.	हे ऋभुक्षाः	हे ऋभुक्षाणौ	हे ऋभुक्षाणः
द्वि.	ऋभुक्षाणम्	ऋभुक्षाणौ	ऋभुक्षः

	एकव०	द्विव०	बहुव०
तृ.	ऋभुक्षा	ऋभुक्षिभ्याम्	ऋभुक्षिभिः
च.	ऋभुक्षे	,,	ऋभुक्षिभ्यः
प.	ऋभुक्षः	,,	,,
ष.	,,	ऋभुक्षोः	ऋभुक्षाम्
स.	ऋभुक्षि	,,	ऋभुक्षिषु

(ऋभुक्षाः=इन्द्रः).

२१७ नकारान्तः पुँल्लिङ्गः बहुवचनान्तः 'पञ्चन्' शब्दः। तथा च 'परमपञ्चन्' शब्दः ।

m. Five, and good five.

	'पञ्चन्'		'परमपञ्चन्'
	बहुव०		बहुव०
प्र.	पञ्च	प्र.	परमपञ्च
सं.	हे पञ्च	सं.	हे परमपञ्च
द्वि.	पञ्च	द्वि.	परमपञ्च
तृ.	पञ्चभिः	तृ.	परमपञ्चभिः
च.	पञ्चभ्यः	च.	परमपञ्चभ्यः
प	पञ्चभ्यः	पं.	परमपञ्चभ्य.
ष.	पञ्चानाम्	ष.	परमपञ्चानाम्
स.	पञ्चसु	स.	परमपञ्चसु

(परमाश्च ते पञ्च च परमपञ्च)

एवं–सप्तन्, नवन्, दशन्, एकादशन् शब्दप्रभृतयः अष्टादशन् शब्दपर्यन्ताः संख्यावाचकशब्दाः।

२१८ नकारान्तः पुँल्लिङ्गः 'प्रियपञ्चन्' शब्दः।

m. One loving five.

प्र.	प्रियपञ्चा	प्रियपञ्चानौ	प्रियपञ्चानः
सं.	हे प्रियपञ्चन्	हे प्रियपञ्चानौ	हे प्रियपञ्चानः
द्वि.	प्रियपञ्चानम्	प्रियपञ्चानौ	प्रियपञ्चः
तृ.	प्रियपञ्चा	प्रियपञ्चभ्याम्	प्रियपञ्चभिः
च.	प्रियपञ्चे	,,	प्रियपञ्चभ्यः

	एकव०	द्विव०	बहुव०
प.	प्रियपञ्चः	प्रियपञ्चभ्याम्	प्रियपञ्चभ्यः
ष.	,,	प्रियपञ्चोः	प्रियपञ्चानाम्
स.	प्रियपञ्चि	,,	प्रियपञ्चसु

(प्रियाः पञ्च यस्य सः प्रियपञ्चा=प्रियपञ्चसंख्यः).

एवं–प्रियसप्तनप्रभृतयः प्रियाष्टादशन्पर्यन्ताः शब्दाः ।

२१९ नकारान्तः पुँल्लिङ्गो बहुवचनान्तः 'अष्टन्' शब्दः।

m. Eight.

	बहुव०
प्र.	अष्टौ, अष्ट
सं.	हे अष्टौ, हे अष्ट
द्वि.	अष्टौ, अष्ट
तृ.	अष्टाभिः, अष्टभिः
च.	अष्टाभ्यः, अष्टभ्यः
प.	अष्टाभ्यः, अष्टभ्यः
ष.	अष्टानाम्, अष्टनाम्
स.	अष्टासु, अष्टसु

२२० नकारान्तः पुँल्लिङ्गः 'प्रियाष्टन्' शब्दः ।

m. One loving eight.

	एकव०	द्विव०	बहुव०
प्र.	प्रियाष्टा	प्रियाष्टानौ	प्रियाष्टानः
स.	हे प्रियाष्टन्	हे प्रियाष्टानौ	हे प्रियाष्टानः
द्वि.	प्रियाष्टानम्	प्रियाष्टानौ	प्रियाष्ट्नः
तृ.	प्रियाष्ट्ना	प्रियाष्टाभ्याम्, प्रियाष्टभ्याम्	प्रियाष्टाभिः, प्रियाष्टभिः
च.	प्रियाष्ट्ने	,, ,,	प्रियाष्टाभ्यः, प्रियाष्टभ्यः
प.	प्रियाष्ट्नः	,, ,,	,, ,,

	एकव०	द्विव०	बहुव०
ष	प्रियाष्टः	प्रियाष्टोः	प्रियाष्टानाम्
स.	प्रियाष्टि, प्रियाष्टनि	"	प्रियाष्टासु, प्रियाष्टसु

(प्रियाः अष्टौ यस्य सः प्रियाष्टा=प्रियाष्टसङ्ख्य).

२२१ नकारान्तः पुँल्लिङ्गः 'दीर्घाहन्' शब्दः ।

m. Summer.

प्र	दीर्घाहाः	दीर्घाहानौ	दीर्घाहानः
स	हे दीर्घाहः	हे दीर्घाहानौ	हे दीर्घाहान
द्वि	दीर्घाहानम्	दीर्घाहानौ	दीर्घाह्नः
तृ.	दीर्घाह्ना	दीर्घाहोभ्याम्	दीर्घाहोभिः
च	दीर्घाह्ने	दीर्घाहोभ्याम्	दीर्घाहोभ्यः
प	दीर्घाह्नः	दीर्घाहोभ्याम्	दीर्घाहोभ्यः
ष	दीर्घाह्नः	दीर्घाह्नोः	दीर्घाह्नाम्
स	दीर्घाह्नि, दीर्घाहानि	दीर्घाह्नोः	दीर्घाहःसु

(दीर्घाणि अहानि यस्मिन् सः दीर्घाहाः=ग्रीष्मर्तुः).

२२२ धकारान्तः पुंल्लिङ्गः 'बुध्' शब्दः ।

m. Knowing, learned.

प्र	भुत्, भुद्	बुधौ	बुधः
स.	हे भुत्, हे भुद्	हे बुधौ	हे बुधः
द्वि.	बुधम्	बुधौ	बुधः
तृ.	बुधा	भुद्भ्याम्	भुद्भिः
च.	बुधे	"	भुद्भ्यः
प	बुधः	"	"
ष	"	बुधोः	बुधाम्
स	बुधि	"	भुत्सु

(बोधति इति भुत्-द्=विद्वान्).

एवं–मर्माविध्, सुयुध्, अतिक्षुध्, प्रभृतयः ।

२२३ जकारान्तः पुंलिङ्गो 'युज्' शब्दः ।

m. A joiner.

	बहुव०	द्विव०	बहुव०
प्र.	युङ्	युञ्जौ	युञ्जः
सं.	हे युङ्	हे युञ्जौ	हे युञ्जः
द्वि.	युञ्जम्	युञ्जौ	युजः
तृ.	युजा	युग्भ्याम्	युग्भिः
च.	युजे	,,	युग्भ्यः
पं.	युजः	,,	,,
ष.	,,	युजोः	युजाम्
स.	युजि	,,	युक्षु

(युनक्ति इति युङ्=योजकः).

२२४ जकारान्तः पुँल्लिङ्गः 'सुयुज्' शब्दः ।

m. Contriving well.

प्र	सुयुक्, सुयुग्	सुयुजौ	सुयुजः
स.	हे सुयुक्, हे सुयुग्	हे सुयुजौ	हे सुयुजः
द्वि	सुयुजम्	सुयुजौ	सुयुजः
तृ.	सुयुजा	सुयुग्भ्याम्	सुयुग्भिः
च.	सुयुजे	,,	सुयुग्भ्यः
प.	सुयुजः	,,	,,
ष	,,	सुयुजोः	सुयुजाम्
स.	सुयुजि	,,	सुयुक्षु

(सुष्ठु युनक्ति इति सुयुक्=सुयोजकः)

२२५ जकारान्तः पुँल्लिङ्गः 'युज्' शब्दः ।

m. A sage.

प्र.	युक्-ग्	युजौ	युजः
स.	हे युक्-ग्	हे युजौ	हे युजः
द्वि.	युजम्	युजौ	युजः

	एकव०	द्विव०	बहुव०
तृ.	युजा	युग्भ्याम्	युग्भिः
च	युजे	,,	युग्भ्यः
प.	युजः	,,	,,
ष.	,,	युजोः	युजाम्
स	युजि	,,	युक्षु

(युजते समाधत्ते इति युक्)

एव-महीभुज, सरुज्, प्रभृतयः ।

२२६ जकारान्तः पुँल्लिङ्गः 'खञ्' शब्दः ।

m. Limping.

प्र	खन्	खञ्जौ	खञ्जः
स	हे खन्	हे खञ्जौ	हे खञ्जः
द्वि.	खञ्जम्	खञ्जौ	खञ्जः
तृ	खञ्जा	खन्भ्याम्	खन्भिः
च.	खञ्जे	,,	खन्भ्यः
पं	खञ्जः	,,	,,
ष	,,	खञ्जोः	खञ्जाम्
स.	खञ्जि	,,	खन्सु

(खञ्जति इति खन्)

२२७ जकारान्तः पुँल्लिङ्गः 'राज्' शब्दः ।

m Shining.

प्र	{ राट्, राड्	राजौ	राजः
स	{ हे राट्, हे राड्	हे राजौ	हे राजः
द्वि.	राजम्	राजौ	राजः
तृ.	राजा	राड्भ्याम्	राड्भिः
च.	राजे	,,	राड्भ्यः
प.	राजः	,,	,,

	एकव०	द्विव०	बहुव०
ष.	राजः	राजोः	राजाम्
स.	राजि	,,	राट्त्सु, राट्सु

(राजते असौ राट्)

एव-सम्राज्, स्वाराज्, विराज्, प्रभृतयः ।

२२८ जकारान्तः पुँल्लिङ्गः 'विभ्राज्' शब्दः ।

m. Shining.

प्र.	विभ्राट्, विभ्राड्, विभ्राक्, विभ्राग्	विभ्राजौ	विभ्राजः
सं.	हे विभ्राट्, हे विभ्राड्, हे विभ्राक्, हे विभ्राग्	हे विभ्राजौ	हे विभ्राजः
द्वि.	विभ्राजम्	विभ्राजौ	विभ्राजः
तृ.	विभ्राजा	विभ्राड्भ्याम्, विभ्राग्भ्याम्	विभ्राड्भिः, विभ्राग्भिः
च.	विभ्राजे	,, ,,	विभ्राड्भ्यः, विभ्राग्भ्यः
पं.	विभ्राजः	,, ,,	,, ,,
ष.	,,	विभ्राजोः	विभ्राजाम्
स.	विभ्राजि	,,	विभ्राट्त्सु, विभ्राट्सु; विभ्राक्षु

(विभ्राजते दीप्यते इति विभ्राट्, विभ्राक्=देदीप्यमानः).

२२९ जकारान्तः पुँल्लिङ्गः 'देवेज्' शब्दः ।

m. One who worships a god.

प्र.	देवेट्, देवेड्	देवेजौ	देवेजः
सं.	हे देवेट्, हे देवेड्	हे देवेजौ	हे देवेजः
द्वि.	देवेजम्	देवेजौ	देवेजः

	एकव०	द्विव०	बहुव०
तृ.	देवेजा	देवेड्भ्याम्	देवेड्भिः
च.	देवेजे	,,	देवेड्भ्यः
प.	देवेजः	,,	,,
ष.	,,	देवेजोः	देवेजाम्
स.	देवेजि	,,	देवेट्त्सु, देवेट्सु

(देवान् यजते इति देवेट्).

२३० जकारान्तः पुँल्लिङ्गः 'विश्वसृज्' शब्दः ।

m The creator.

प्र.	विश्वसृट्, विश्वसृड्	विश्वसृजौ	विश्वसृजः
स	हे विश्वसृट्, हे विश्वसृड्	हे विश्वसृजौ	हे विश्वसृजः
द्वि	विश्वसृजम्	विश्वसृजौ	विश्वसृजः
तृ.	विश्वसृजा	विश्वसृड्भ्याम्	विश्वसृड्भिः
च.	विश्वसृजे	,,	विश्वसृड्भ्यः
प.	विश्वसृजः	,,	,,
ष.	,,	विश्वसृजोः	विश्वसृजाम्
स.	विश्वसृजि	,,	विश्वसृट्त्सु, विश्वसृट्सु

(विश्वं सृजति इति विश्वसृट्=ब्रह्मा).

२३१ जकारान्तः पुँल्लिङ्गः 'परिमृज्' शब्दः ।

m. One who searches.

प्र.	परिमृट्, परिमृड्	परिमृजौ	परिमृजः
स.	हे परिमृट्, हे परिमृड्	हे परिमृजौ	हे परिमृजः
द्वि.	परिमृजम्	परिमृजौ	परिमृजः
तृ.	परिमृजा	परिमृड्भ्याम्	परिमृड्भिः
च.	परिमृजे	,,	परिमृड्भ्यः

	एकव०	द्विव०	बहुव०
पं.	परिमृजः	परिमृड्भ्याम्	परिमृड्भ्यः
ष.	,,	परिमृजोः	परिमृजाम्
स.	परिमृजि	,,	परिमृट्त्सु, परिमृट्सु

(परिमार्ष्टि इति परिमृट्=शोधकः)

२३२ जकारान्तः पुँल्लिङ्गः 'परिव्राज्' शब्दः ।

m. An ascetic.

प्र.	परिव्राट्, परिव्राड्	परिव्राजौ	परिव्राजः
स	हे परिव्राट्, हे परिव्राड्	हे परिव्राजौ	हे परिव्राजः
द्वि.	परिव्राजम्	परिव्राजौ	परिव्राजः
तृ.	परिव्राजा	परिव्राड्भ्याम्	परिव्राड्भिः
च.	परिव्राजे	,,	परिव्राड्भ्यः
प.	परिव्राजः	,,	,,
ष.	,,	परिव्राजोः	परिव्राजाम्
स.	परिव्राजि	,,	परिव्राट्त्सु, परिव्राट्सु

(परित्यज्य [रुदन्त पुत्रादिकमनादृत्य] व्रजति इति परिव्राट्=सन्यासी)

२३३ जकारान्तः पुँल्लिङ्गो 'विश्वराज्' शब्दः ।

m. Soul.

प्र	विश्वराट्, विश्वराड्	विश्वराजौ	विश्वराज
स.	हे विश्वराट्, हे विश्वराड्	हे विश्वराजौ	हे विश्वराजः
द्वि.	विश्वराजम्	विश्वराजौ	विश्वराजः
तृ.	विश्वराजा	विश्वाराड्भ्याम्	विश्वाराड्भिः
च.	विश्वराजे	,,	विश्वाराड्भ्य;
प.	विश्वराजः	,,	,,

	एकव०	द्विव०	बहुव०
ष.	विश्वराजः	विश्वराजोः	विश्वराजाम्
स.	विश्वराजि	,,	{ विश्वाराड्त्सु, विश्वाराट्सु

(विश्वस्मिन् राजते असौ विश्वाराट्=आत्मा).

२३४ जकारान्तः पुँल्लिङ्गः 'भृस्ज्' शब्दः ।

m. One who roasts.

प्र.	{ भृट्, भृड्	भृज्जौ	भृज्जः
सं.	{ हे भृट्, हे भृड्	हे भृज्जौ	हे भृज्जः
द्वि.	भृज्जम्	भृज्जौ	भृज्जः
तृ.	भृज्जा	भृड्भ्याम्	भृड्भिः
च.	भृज्जे	भृड्भ्याम्	भृड्भ्यः
प.	भृज्जः	,,	,,
ष.	,,	भृज्जोः	भृज्जाम्
स.	भृज्जि	,,	{ भृट्त्सु, भृट्सु

(भृजति पचति इति भृट्=पाचकः)

२३५ जकारान्तः पुँल्लिङ्गः 'ऋत्विज्' शब्दः।

m. A priest.

प्र.	{ ऋत्विक्, ऋत्विग्	ऋत्विजौ	ऋत्विजः
सं	{ हे ऋत्विक्, हे ऋत्विग्	हे ऋत्विजौ	हे ऋत्विजः
द्वि.	ऋत्विजम्	ऋत्विजौ	ऋत्विजः
तृ.	ऋत्विजा	ऋत्विग्भ्याम्	ऋत्विग्भिः
च.	ऋत्विजे	,,	ऋत्विग्भ्यः
प.	ऋत्विजः	,,	,,
ष.	,,	ऋत्विजोः	ऋत्विजाम्
स.	ऋत्विजि	,,	ऋत्विक्षु

(ऋतौ यजते इति ऋत्विक्=ब्राह्मणः).

२३६ जकारान्तः पुँल्लिङ्गः ‘ ऊर्ज् ’ शब्दः ।

m. One who is vigorous in strength.

	एकव०	द्विव०	बहुव०
प्र.	ऊर्क्, ऊर्ग्	ऊर्जौ	ऊर्जः
सं.	हे ऊर्क्, हे ऊर्ग्	हे ऊर्जौ	हे ऊर्जः
द्वि.	ऊर्जम्	ऊर्जौ	ऊर्जः
तृ.	ऊर्जा	ऊर्ग्भ्याम्	ऊर्ग्भिः
च.	ऊर्जे	ऊर्ग्भ्याम्	ऊर्ग्भ्यः
पं.	ऊर्जः	,,	,,
ष.	,,	ऊर्जोः	ऊर्जाम्
स.	ऊर्जि	,,	ऊर्क्षु

(ऊर्जयति प्राणिति, बलवान् भवति इति वा ऊर्क्=बलिष्ठः).

एव–मूर्ज्.

२३७ जकारान्तः पुँल्लिङ्गः ‘ अवयाज् ’ शब्दः ।

m. A Priest.

प्र.	अवयाः	अवयाजौ	अवयाजः
स.	हे अवया.	हे अवयाजौ	हे अवयाजः
द्वि.	अवयाजम्	अवयाजौ	अवयाजः
तृ.	अवयाजा	अवयोभ्याम्	अवयोभिः
च.	अवयाजे	अवयोभ्याम्	अवयोभ्यः
पं.	अवयाजः	अवयोभ्याम्	अवयोभ्यः
ष.	अवयाजः	अवयाजोः	अवयाजाम्
स.	अवयाजि	अवयाजोः	अवयःसु

(अवयजति इति अवयाः=अध्वर्युः)

२३८ दकारान्तः पुँल्लिङ्गः सर्वनामसंज्ञकः ‘त्यद्’ शब्दः ।

m. He.

प्र.	स्यः	त्यौ	त्ये

१ अय शब्दः प्रायो वेद एव परोक्षप्रकार्थे प्रयुज्यते–“ सच स्यचाभवत् ” इत्यादिषु दर्शनात् । लौकिकप्रयोगेष्वदर्शनात् ।

	एकव०	द्विव०	बहुव०
द्वि.	त्यम्	त्यौ	त्यान्
तृ.	त्येन	त्याभ्याम्	त्यैः
च.	त्यस्मै	,,	त्येभ्यः
पं.	त्यस्मात्	,,	,,
ष	त्यस्य	त्ययोः	त्येषाम्
स.	त्यस्मिन्	,,	त्येषु

(स्यः—स. इत्यर्थः).

२३९ दकारान्तः पुँल्लिङ्गः 'अतित्यद्' शब्दः ।

m. He that is good.

प्र	अतित्यत्, अतित्यद्	अतित्यदौ	अतित्यदः
द्वि	अतित्यदम्	,,	,,
तृ	अतित्यदा	अतित्यद्भ्याम्	अतित्यद्भिः
च	अतित्यदे	,,	अतित्यद्भ्यः
प.	अतित्यदः	,,	,,
ष.	,,	अतित्यदोः	अतित्यदाम्
स.	अतित्यदि	,,	अतित्यत्सु

(अतिक्रान्त त्यम् इति अतित्यत्)

२४० दकारान्तः पुँल्लिङ्गः सर्वनामसंज्ञकः 'तद्' शब्दः ।

m. He.

प्र.	सः	तौ	ते
द्वि.	तम्	तौ	तान्
तृ.	तेन	ताभ्याम्	तैः
च.	तस्मै	,,	तेभ्यः
पं.	तस्मात्	,,	,,
ष.	तस्य	तयोः	तेषाम्
स.	तस्मिन्	,,	तेषु

२४१ दकारान्त पुँल्लिङ्गः 'परमतद्' शब्दः ।

m. One beyond that.

प्र.	परमसः	परमतौ	परमते
द्वि.	परमतम्	,,	परमतान्

	एकव०	द्विव०	बहुव०
तृ.	परमतेन	परमताभ्याम्	परमतैः
च.	परमतस्मै	,,	परमतेभ्यः
पं.	परमतस्मात्	,,	,,
ष.	परमतस्य	परमतयोः	परमतेषाम्
स.	परमतस्मिन्	,,	परमतेषु

(परमश्चासौ सः च परमसः ।).

२४२ दकारान्तः पुँल्लिङ्गो 'यद्' शब्दः ।

m. Who.

प्र.	यः	यौ	ये
द्वि.	यम्	,,	यान्
तृ.	येन	याभ्याम्	यैः
च.	यस्मै	,,	येभ्यः
पं.	यस्मात्	,,	,,
ष.	यस्य	ययोः	येषाम्
स.	यस्मिन्	,,	येषु

२४३ दकारान्तः पुँल्लिङ्गः 'एतद्' शब्दः।

m. This.

प्र.	एषः	एतौ	एते
द्वि	एतम्, एनम्	एतौ, एनौ	एतान्, एनान्
तृ.	एतेन, एनेन	एताभ्याम्	एतैः
च.	एतस्मै	,,	एतेभ्यः
पं.	एतस्मात्	,,	,,
ष.	एतस्य	एतयोः, एनयोः	एतेषाम्
स.	एतस्मिन्	,, ,,	एतेषु

२४४ दकारान्तः त्रिलिङ्गस्वरूपः 'युष्मद्' शब्दः ।

m. f. n. You.

	एकव०	द्विव०	बहुव०
प्र.	त्वम्	युवाम्	यूयम्
द्वि.	त्वाम्, त्वा	युवाम्, वाम्	युष्मान्, वः
तृ.	त्वया	युवाभ्याम्	युष्माभिः
च.	तुभ्यम्, ते	युवाभ्याम्, वाम्	युष्मभ्यम्, वः
प.	त्वत्	युवाभ्याम्	युष्मत्
ष.	तव, ते	युवयोः, वाम्	युष्माकम्, वः
स.	त्वयि	युवयोः	युष्मासु

२४५ दकारान्तस्त्रिलिङ्गस्वरूपः समस्यमानैकवचन-युष्मच्छब्दान्तर्गतः 'अतियुष्मद्' शब्दः ।

m. f. n. Superior to you.

प्र.	अतित्वम्	अतित्वाम्	अतियूयम्
द्वि.	अतित्वाम्	,,	अतित्वान्
तृ.	अतित्वया	अतित्वाभ्याम्	अतित्वाभिः
च.	अतितुभ्यम्	,,	अतित्वभ्यम्
पं.	अतित्वत्	,,	अतित्वत्
ष.	अतितव	अतित्वयोः	अतित्वाकम्
स.	अतित्वयि	,,	अतित्वासु

(त्वाम् अतिक्रान्तः, ता, तम्–इति अतित्वम्=त्वदपेक्षयाधिकः)

२४६ दकारान्तस्त्रिलिङ्गस्वरूपः समस्यमानद्विवचन-युष्मच्छब्दान्तर्गतः 'अतियुष्मद्' शब्दः ।

m. f. n Superior to you both.

प्र.	अतित्वम्	अतियुवाम्	अतियूयम्
द्वि.	अतियुवाम्	अतियुवाम्	अतियुवान्

	एकव०	द्विव०	बहुव०
तृ	अतियुवया	अतियुवाभ्याम्	अतियुवाभिः
च.	अतितुभ्यम्	,,	अतियुवभ्यम्
पं.	अतियुवत्	,,	अतियुवत्
ष.	अतितव	अतियुवयोः	अतियुवाकम्
स.	अतियुवयि	,,	अतियुवासु

(युवाम् अतिक्रान्तः, ता, तम्–इति अतित्वम्=युवयोरपेक्षयाधिकः)

२४७ दकारान्तस्त्रिलिङ्गसरूपः समस्यमानबहुवचन-युष्मच्छब्दान्तर्गतः 'अतियुष्मद्' शब्दः ।

m. f. n. Superior to you all.

प्र.	अतित्वम्	अतियुष्माम्	अतियूयम्
द्वि.	अतियुष्माम्	,,	अतियुष्मान्
तृ.	अतियुष्मया	अतियुष्माभ्याम्	अतियुष्माभिः
च.	अतितुभ्यम्	,,	अतियुष्मभ्यम्
पं.	अतियुष्मत्	,,	अतियुष्मत्
ष.	अतितव	अतियुष्मयोः	अतियुष्माकम्
स.	अतियुष्मयि	,,	अतियुष्मासु

२४८ दकारान्तस्त्रिलिङ्गसरूपः 'अस्मद्' शब्दः ।

m. f. n. I.

प्र.	अहम्	आवाम्	वयम्
द्वि.	माम्, मा	आवाम्, नौ	अस्मान्, नः
तृ.	मया	आवाभ्याम्	अस्माभिः
च.	मह्यम्, मे	आवाभ्याम्, नौ	अस्मभ्यम्, नः
पं.	मत्	आवाभ्याम्	अस्मत्
ष.	मम, मे	आवयोः, नौ	अस्माकम्, नः
स.	मयि	आवयोः	अस्मासु

२४९. दकारान्तस्त्रिलिङ्गसरूपः समस्यमानैकवचनास्मच्छब्दान्तर्गतः 'अत्यस्मद्' शब्दः ।

m f. n. Superior to me.

	एकव०	द्विव०	बहुव०
प्र.	अत्यहम्	अतिमाम्	अतिवयम्
द्वि.	अतिमाम्	अतिमाम्	अतिमान्
तृ.	अतिमया	अतिमाभ्याम्	अतिमाभिः
च.	अतिमह्यम्	अतिमाभ्याम्	अतिमभ्यम्
पं.	अतिमत्	अतिमाभ्याम्	अतिमत्
ष.	अतिमम	अतिमयोः	अतिमाकम्
स.	अतिमयि	अतिमयोः	अतिमासु

(माम् अतिक्रान्तः, ता, तम्–इति अत्यहम्=मदपेक्षयाधिकः)

२५० दकारान्तस्त्रिलिङ्गसरूपः समस्यमानद्विवचनास्मच्छब्दान्तर्गतः 'अत्यस्मद्' शब्दः ।

m. f. n. Superior to us both.

प्र.	अत्यहम्	अत्यावाम्	अतिवयम्
द्वि.	अत्यावाम्	अत्यावाम्	अत्यावान्
तृ.	अत्यावया	अत्यावाभ्याम्	अत्यावाभिः
च.	अतिमह्यम्	अत्यावाभ्याम्	अत्यावभ्याम्
पं.	अत्यावत्	अत्यावाभ्याम्	अत्यावत्
ष.	अतिमम	अत्यावयोः	अत्यावाकम्
स.	अत्यावयि	अत्यावयोः	अत्यावासु

(आवाम् अतिक्रान्तः, ता, तम्–इति अत्यहम्=आवयोरपेक्षयाधिकः)

२५१ दकारान्तस्त्रिलिङ्गसरूपः समस्यमानबहुवचनास्मच्छब्दान्तर्गतः 'अत्यस्मद्' शब्दः ।

m. f. n. Superior to us all.

प्र.	अत्यहम्	अत्यस्माम्	अतिवयम्
द्वि.	अत्यस्माम्	अत्यस्माम्	अत्यस्मान्

	एकव०	द्विव०	बहुव०
तृ.	अत्यस्मया	अत्यस्माभ्याम्	अत्यस्माभिः
च.	अतिमह्यम्	अत्यस्माभ्याम्	अत्यस्मभ्यम्
पं.	अत्यस्मत्	अत्यस्माभ्याम्	अत्यस्मत्
ष.	अतिमम	अत्यस्मयोः	अत्यस्माकम्
स.	अत्यस्मयि	अत्यस्मयोः	अत्यस्मासु

(अस्मान् अतिक्रान्तः, ता, तम्—इति अत्यहम्=अस्माकमपेक्षयाधिकः)

२५२ दकारान्तः पुँल्लिङ्गः 'सुपाद्' शब्दः ।

m. One having handsome feet.

प्र.	सुपाद्, सुपात्	सुपादौ	सुपादः
सं.	हे सुपाद्, हे सुपात्	हे सुपादौ	हे सुपादः
द्वि.	सुपादम्	सुपादौ	सुपदः
तृ.	सुपदा	सुपाद्भ्याम्	सुपाद्भिः
च.	सुपदे	,,	सुपाद्भ्यः
पं.	सुपदः	,,	,,
ष	,,	सुपदोः	सुपदाम्
स.	सुपदि	,,	सुपात्सु

(शोभनौ पादौ यस्य सः सुपात्=शोभनपादः).

२५३ थकारान्तः पुँल्लिङ्गः 'अग्निमथ्' शब्दः ।

m. The fire producing woods-sticks.

प्र.	अग्निमत्, अग्निमद्	अग्निमथौ	अग्निमथः
सं.	हे अग्निमत्, हे अग्निमद्	हे अग्निमथौ	हे अग्निमथः
द्वि.	अग्निमथम्	अग्निमथौ	अग्निमथः
तृ.	अग्निमथा	अग्निमद्भ्याम्	अग्निमद्भिः
च.	अग्निमथे	,,	अग्निमद्भ्यः
प.	अग्निमथः	,,	,,

	एकव०	द्विव०	बहुव०
ष.	अग्निमथः	अग्निमथोः	अग्निमथाम्
स.	अग्निमथि	,,	अग्निमत्सु

(अग्निं मथ्नाति इति अग्निमत्—अरणिः)

२५४ चकारान्तः पुँल्लिङ्गः 'प्राञ्च्' शब्दः ।

m. A good traveller.

प्र.	प्राङ्	प्राञ्चौ	प्राञ्चः
सं.	हे प्राङ्	हे प्राञ्चौ	हे प्राञ्चः
द्वि.	प्राञ्चम्	प्राञ्चौ	प्राचः
तृ.	प्राचा	प्राग्भ्याम्	प्राग्भिः
च.	प्राचे	,,	प्राग्भ्यः
पं.	प्राचः	,,	,,
ष.	,,	प्राचोः	प्राचाम्
स.	प्राचि	,,	प्राक्षु

(प्रकर्षेण अञ्चति गच्छति इति प्राङ्=सुगन्ता)

२५५ चकारान्तः पुँल्लिङ्गः 'प्राञ्च्' शब्दः ।

m. The Most Reverend.

प्र.	प्राङ्	प्राञ्चौ	प्राञ्चः
सं.	हे प्राङ्	हे प्राञ्चौ	हे प्राञ्चः
द्वि.	प्राञ्चम्	प्राञ्चौ	प्राञ्चः
तृ.	प्राञ्चा	प्राङ्भ्याम्	प्राङ्भिः
च.	प्राञ्चे	,,	प्राङ्भ्यः
पं.	प्राञ्चः	,,	,,
ष.	,,	प्राञ्चोः	प्राञ्चाम्
स.	प्राञ्चि	,,	प्राङ्क्षु, प्राङ्षु

(प्रकर्षेण अञ्च्यते पूज्यते इति प्राङ्=पूज्यः)

२५६ चकारान्तः पुँल्लिङ्गः 'प्रत्यञ्च्' शब्दः ।

m. One who has departed.

	एकव०	द्विव०	बहुव०
प्र.	प्रत्यङ्	प्रत्यञ्चौ	प्रत्यञ्चः
सं.	हे प्रत्यङ्	हे प्रत्यञ्चौ	हे प्रत्यञ्चः
द्वि.	प्रत्यञ्चम्	प्रत्यञ्चौ	प्रत्यञ्चः, प्रतीचः
तृ.	प्रत्यञ्चा, प्रतीचा	प्रत्यङ्भ्याम्, प्रत्यग्भ्याम्	प्रत्यङ्भिः प्रत्यग्भिः
च	प्रत्यञ्चे, प्रतीचे	प्रत्यङ्भ्याम्, प्रत्यग्भ्याम्	प्रत्यङ्भ्यः, प्रत्यग्भ्यः
पं.	प्रत्यञ्चः, प्रतीचः	प्रत्यङ्भ्याम्, प्रत्यग्भ्याम्	प्रत्यङ्भ्यः, प्रत्यग्भ्यः
ष	प्रत्यञ्चः, प्रतीचः	प्रत्यञ्चोः, प्रतीचोः	प्रत्यञ्चाम्, प्रतीचाम्
स	प्रत्यञ्चि, प्रतीचि	प्रत्यञ्चोः, प्रतीचोः	प्रत्यङ्क्षु, प्रत्यङ्षु ; प्रत्यक्षु

(प्रत्यञ्चति इति प्रत्यङ्=परावृत्तः)

२५७ चकारान्तः पुँल्लिङ्गः 'अदद्र्यञ्च्' शब्दः ।

m. One going to that person.

प्र.	अमुमुयङ्	अमुमुयञ्चौ	अमुमुयञ्चः
द्वि	अमुमुयञ्चम्	अमुमुयञ्चौ	अमुमुईचः
तृ.	अमुमुईचा	अमुमुयग्भ्याम्	अमुमुयग्भिः
च.	अमुमुईचे	अमुमुयग्भ्याम्	अमुमुयग्भ्यः
पं.	अमुमुईचः	अमुमुयग्भ्याम्	अमुमुयग्भ्यः
ष.	अमुमुईचः	अमुमुईचोः	अमुमुईचाम्
स	अमुमुईचि	अमुमुईचोः	अमुमुयक्षु

(अमुम् अञ्चति इति अमुमुयङ्=अमुं प्रति गन्ता.)

२५८ चकारान्त. पुँल्लिङ्गः (प्रकारान्तरेण) 'अदद्र्यञ्च्' शब्दः।

m One going to that person

	एकव०	द्विव०	बहुव०
प्र	अदमुयङ्	अदमुयञ्चौ	अदमुयञ्च
द्वि	अदमुयञ्चम्	अदमुयञ्चौ	अदमुईच
तृ	अदमुईचा	अदमुयग्भ्याम्	अदमुयग्भि
च	अदमुईचे	अदमुयग्भ्याम्	अदमुयग्भ्य
प.	अदमुईच	अदमुयग्भ्याम्	अदमुयग्भ्य
ष	अदमुईचः	अदमुईचो	अदमुईचाम्
स	अदमुईचि	अदमुईचो	अदमुयक्षु

२५९ चकारान्त पुँल्लिङ्गः (तृतीयप्रकारेण) 'अदद्र्यञ्च्' शब्द ।

m One going to that person

प्र	अदद्र्यङ	अदद्र्यञ्चा	अदद्र्यञ्च
द्वि	अदद्र्यञ्चम	अदद्र्यञ्चौ	अदद्रीच
तृ	अदद्रीचा	अदद्र्यग्भ्याम्	अदद्र्यग्भि
च	अदद्रीचे	अदद्र्यग्भ्याम	अदद्र्यग्भ्य
प	अदद्रीच	अदद्र्यग्भ्याम्	अदद्र्यग्भ्य
ष	अदद्रीच	अदद्रीचा	अदद्रीचाम
स	अदद्रीचि	अदद्रीचा	अदद्र्यक्षु

२६० चकारान्तः पुँल्लिङ्गः 'विष्वद्र्यञ्च्' शब्दः।

m. One comprehending all God

प्र	विष्वद्र्यङ्	विष्वद्र्यञ्चौ	विष्वद्र्यञ्च
स	हे विष्वद्र्यङ	हे विष्वद्र्यञ्चौ	हे विष्वद्र्यञ्च
द्वि	विष्वद्र्यञ्चम	विष्वद्र्यञ्चौ	विष्वद्रीच
तृ	विष्वद्रीचा	विष्वद्र्यग्भ्याम्	विष्वद्र्यग्भि
च	विष्वद्रीचे	विष्वद्र्यग्भ्याम	विष्वद्र्यग्भ्य

	एकव०	द्विव०	बहुव०
पं.	विष्वद्रीचः	विष्वद्र्यग्भ्याम्	विष्वद्र्यग्भ्यः
ष.	विष्वद्रीचः	विष्वद्रीचोः	विष्वद्रीचाम्
स.	विष्वद्रीचि	विष्वद्रीचोः	विष्वद्र्यक्षु

(विष्वक् अञ्चति इति विष्वद्र्यङ्=समन्तात् व्यापकः).

२६१ चकारान्तः पुँल्लिङ्गो 'देवद्र्यञ्च्' शब्दः ।

m. One who has submitted to God.

प्र	देवद्र्यङ्	देवद्र्यञ्चौ	देवद्र्यञ्चः
सं.	हे देवद्र्यङ्	हे देवद्र्यञ्चौ	हे देवद्र्यञ्चः
द्वि.	देवद्र्यञ्चम्	देवद्र्यञ्चौ	देवद्रीचः
तृ.	देवद्रीचा	देवद्र्यग्भ्याम्	देवद्र्यग्भिः
च.	देवद्रीचे	देवद्र्यग्भ्याम्	देवद्र्यग्भ्यः
पं.	देवद्रीचः	देवद्र्यग्भ्याम्	देवद्र्यग्भ्यः
ष.	देवद्रीचः	देवद्रीचोः	देवद्रीचाम्
स.	देवद्रीचि	देवद्रीचोः	देवद्र्यक्षु

(देवान् अञ्चति शरणं गच्छति इति देवद्र्यङ्=देवशरणागतः).

२६२ चकारान्तः पुँल्लिङ्गः 'उदञ्च्' शब्दः ।

m. Going upwards or towards the north.

प्र.	उदङ्	उदञ्चौ	उदञ्चः
सं.	हे उदङ्	हे उदञ्चौ	हे उदञ्चः
द्वि.	उदञ्चम्	उदञ्चौ	उदञ्चः, उदीचः
तृ.	उदञ्चा, उदीचा	उदङ्भ्याम्, उदग्भ्याम्	उदङ्भिः, उदग्भिः
च	उदञ्चे, उदीचे	उदङ्भ्याम्, उदग्भ्याम्	उदङ्भ्यः, उदग्भ्यः
प.	उदञ्चः, उदीचः	उदङ्भ्याम्, उदग्भ्याम्	उदङ्भ्यः, उदग्भ्यः

	एकव०	द्विव०	बहुव०
ष.	उदञ्चः, उदीचः	उदञ्चोः, उदीचोः	उदञ्चाम्, उदीचाम्
स.	उदञ्चि, उदीचि	उदञ्चोः, उदीचोः	उदङ्क्षु, उदङ्षु, उदक्षु

(उदङ्चति इति उदङ्, ऊर्ध्वगन्ता=उत्तरदिक्स्थश्च)

२६३ चकारान्तः पुँल्लिङ्गः 'सम्यञ्च्' शब्दः ।

m. Behaving well, right.

प्र.	सम्यङ्	सम्यञ्चौ	सम्यञ्चः
सं.	हे सम्यङ्	हे सम्यञ्चौ	हे सम्यञ्चः
द्वि.	सम्यञ्चम्	सम्यञ्चौ	सम्यञ्चः, समीचः
तृ.	सम्यञ्चा, समीचा	सम्यङ्भ्याम्, सम्यग्भ्याम्	सम्यङ्भिः, सम्यग्भिः
च	सम्यञ्चे, समीचे	सम्यङ्भ्याम्, सम्यग्भ्याम्	सम्यङ्भ्यः, सम्यग्भ्यः
पं.	सम्यञ्चः, समीचः	सम्यङ्भ्याम्, सम्यग्भ्याम्	सम्यङ्भ्यः, सम्यग्भ्यः
ष.	सम्यञ्चः, समीचः	सम्यञ्चोः, समीचोः	सम्यञ्चाम्, समीचाम्
स	सम्यञ्चि, समीचि	सम्यञ्चोः, समीचोः	सम्यङ्क्षु, सम्यङ्षु; सम्यक्षु

(सम्यगञ्चति इति सम्यङ्–सुगन्ता–शोभनश्च)

२६४ चकारान्तः पुँल्लिङ्गः 'सध्र्यञ्च्' शब्दः ।

m. Companion.

प्र.	सध्र्यङ्	सध्र्यञ्चौ	सध्र्यञ्चः
सं.	हे सध्र्यङ्	हे सध्र्यञ्चौ	हे सध्र्यञ्चः.
द्वि.	सध्र्यञ्चम्	सध्र्यञ्चौ	सध्र्यञ्चः, सध्रीचः
तृ.	सध्र्यञ्चा, सध्रीचा	सध्र्यङ्भ्याम्, सध्र्यग्भ्याम्	सध्र्यङ्भिः, सध्र्यग्भिः.

	एकव०	द्विव०	बहुव०
च	सध्र्यञ्चे, सध्रीचे	सध्र्यङ्भ्याम्, सध्र्यग्भ्याम्	सध्र्यङ्भ्यः, सध्र्यग्भ्यः
पं.	सध्र्यञ्चः, सध्रीचः	सध्र्यङ्भ्याम्, सध्र्यग्भ्याम्	सध्र्यङ्भ्यः, सध्र्यग्भ्यः
ष.	सध्र्यञ्चः, सध्रीचः	सध्र्यञ्चोः, सध्रीचोः	सध्र्यञ्चाम्, सध्रीचाम्
स	सध्र्यञ्चि, सध्रीचि	सध्र्यञ्चोः, सध्रीचोः	सध्र्यङ्क्षु, सध्र्यङ्षु ; सध्र्यक्षु

(सह अञ्चति इति सध्र्यङ्–सहानुयायी)

२६५ चकारान्तः पुँल्लिङ्गः 'तिर्यञ्च्' शब्दः ।

m. An animal.

प्र	तिर्यङ्	तिर्यञ्चौ	तिर्यञ्चः
सं.	हे तिर्यङ्	हे तिर्यञ्चौ	हे तिर्यञ्चः
द्वि.	तिर्यञ्चम्	तिर्यञ्चौ	तिर्यञ्चः, तिरश्चः
तृ	तिर्यञ्चा, तिरश्चा	तिर्यङ्भ्याम्, तिर्यग्भ्याम्	तिर्यङ्भिः, तिर्यग्भिः
च.	तिर्यञ्चे, तिरश्चे	तिर्यङ्भ्याम्, तिर्यग्भ्याम्	तिर्यङ्भ्यः, तिर्यग्भ्यः
पं.	तिर्यञ्चः, तिरश्चः	तिर्यङ्भ्याम्, तिर्यग्भ्याम्	तिर्यङ्भ्यः, तिर्यग्भ्यः
ष.	तिर्यञ्चः, तिरश्चः	तिर्यञ्चोः, तिरश्चोः	तिर्यञ्चाम्, तिरश्चाम्
स	तिर्यञ्चि, तिरश्चि	तिर्यञ्चोः, तिरश्चोः	तिर्यङ्क्षु, तिर्यङ्षु ; तिर्यक्षु

(तिरः अञ्चति इति तिर्यङ्=वक्रगामी).

२६६ चकारान्तः पुँल्लिङ्गः 'क्रुञ्च्' शब्दः ।

m. A heron, a swan.

प्र.	क्रुङ्	क्रुञ्चौ	क्रुञ्चः
सं.	हे क्रुङ्	हे क्रुञ्चौ	हे क्रुञ्चः

	एकव०	द्विव०	बहुव०
द्वि.	क्रुञ्चम्	क्रुञ्चौ	क्रुञ्चः
तृ.	क्रुञ्चा	क्रुङ्भ्याम्	क्रुङ्भिः
च.	क्रुञ्चे	क्रुङ्भ्याम्	क्रुङ्भ्यः
पं.	क्रुञ्चः	क्रुङ्भ्याम्	क्रुङ्भ्यः
ष.	क्रुञ्चः	क्रुञ्चोः	क्रुञ्चाम्
स.	क्रुञ्चि	क्रुञ्चोः	{ क्रुङ्षु, क्रुङ्क्षु

(क्रुञ्चति कुटिलो भवति इति क्रुङ्=कुटिलः).

२६७ चकारान्तः पुँल्लिङ्गः 'पयोमुच्' शब्दः ।

m. A cloud.

प्र.	{ पयोमुक्, पयोमुग्	पयोमुचौ	पयोमुचः
सं.	{ हे पयोमुक्, हे पयोमुग्	हे पयोमुचौ	हे पयोमुचः
द्वि.	पयोमुचम्	पयोमुचौ	पयोमुचः
तृ.	पयोमुचा	पयोमुग्भ्याम्	पयोमुग्भिः
च.	पयोमुचे	पयोमुग्भ्याम्	पयोमुग्भ्यः
प.	पयोमुचः	पयोमुग्भ्याम्	पयोमुग्भ्यः
ष.	पयोमुचः	पयोमुचोः	पयोमुचाम्
स.	पयोमुचि	पयोमुचोः	पयोमुक्षु

(पयांसि मुञ्चति इति पयोमुक्=मेघः).

एवं–सुरुच्, जलमुच्,

२६८ चकारान्तः पुँल्लिङ्गः 'सुवृश्च्' शब्दः ।

m. A good wood cutter.

प्र.	{ सुवृट्, सुवृड्	सुवृश्चौ	सुवृश्चः
सं.	{ हे सुवृट्, हे सुवृड्	हे सुवृश्चौ	हे सुवृश्चः

	एकव०	द्विव०	बहुव०
द्वि.	सुवृश्चम्	सुवृश्चौ	सुवृश्चः
तृ.	सुवृश्चा	सुवृड्भ्याम्	सुवृड्भिः
च.	सुवृश्चे	सुवृड्भ्याम्	सुवृड्भ्यः
प.	सुवृश्चः	सुवृड्भ्याम्	सुवृड्भ्यः
ष.	सुवृश्चः	सुवृश्चोः	सुवृश्चाम्
स.	सुवृश्चि	सुवृश्चोः	{ सुवृट्त्सु, सुवृट्सु

(सुष्ठु वृश्चति छिनत्ति इति सुवृट्=काष्ठतट्)

२६९ तकारान्तः पुँल्लिङ्गः 'बृहत्' शब्दः।

m. Vast.

प्र.	बृहन्	बृहन्तौ	बृहन्तः
स	हे बृहन्	हे बृहन्तौ	हे बृहन्तः
द्वि.	बृहन्तम्	बृहन्तौ	बृहतः
तृ	बृहता	बृहद्भ्याम्	बृहद्भिः
च.	बृहते	बृहद्भ्याम्	बृहद्भ्यः
प.	बृहतः	बृहद्भ्याम्	बृहद्भ्यः
ष.	बृहतः	बृहतोः	बृहताम्
स.	बृहति	बृहतोः	बृहत्सु

(बृह्यते वर्ध्यते इति बृहन्–वर्द्धितः)

एवं–गच्छत्, अश्नत्, श्वसत्, वदत्, भवत्,[1]

२७० तकारान्तः पुँल्लिङ्गो 'महत्' शब्दः।

m. Venerable.

प्र.	महान्	महान्तौ	महान्तः
सं.	हे महन्	हे महान्तौ	हे महान्तः
द्वि.	महान्तम्	महान्तौ	महतः
तृ.	महता	महद्भ्याम्	महद्भिः

---

१ 'भवति इति भवन्' इति 'भू' धातोः वर्तमानकालिककृदन्तः 'भवत्' शब्द 'बृहत्' शब्दवत्। 'भा' धातोर्निष्पन्नः 'डवतु' प्रत्ययान्तो 'भवत्' शब्दः प्रथमैकवचने 'भवान्' इति दीर्घोपान्त्य इति विशेषः।

	एकव०	द्विव०	बहुव०
च.	महते	महद्भ्याम्	महद्भ्यः
पं.	महतः	महद्भ्याम्	महद्भ्यः
ष.	महतः	महतोः	महताम्
स.	महति	महतोः	महत्सु

(मह्यते पूज्यते इति महान्=पूज्यः).

२७१ तकारान्तः पुँल्लिङ्गः 'धीमत्' शब्दः ।

m. Intelligent, one having good intelligence.

प्र.	धीमान्	धीमन्तौ	धीमन्तः
स.	हे धीमन्	हे धीमन्तौ	हे धीमन्तः
द्वि.	धीमन्तम्	धीमन्तौ	धीमतः
तृ.	धीमता	धीमद्भ्याम्	धीमद्भिः
च.	धीमते	धीमद्भ्याम्	धीमद्भ्यः
पं.	धीमतः	धीमद्भ्याम्	धीमद्भ्यः
ष.	धीमतः	धीमतोः	धीमताम्
स.	धीमति	धीमतोः	धीमत्सु

(धीः बुद्धिः अस्य अस्ति इति धीमान्-बुद्धिमान्).

एवं-बुद्धिमत्, श्रीमत्, ह्रीमत्,-गोमत्, धनवत्, वेदवत्, पुत्रवत्, आयुष्मत्-प्रभृतयः ।

२७२ तकारान्तः पुँल्लिङ्गः 'गोमत्' शब्दः ।

m. One Disiring to have cows.

प्र.	गोमान्	गोमन्तौ	गोमन्तः
सं.	हेगोमन्	हेगोमन्तौ	हेगोमन्तः
द्वि.	गोमन्तम्	गोमन्तौ	गोमतः
तृ.	गोमता	गोमद्भ्याम्	गोमद्भिः
च.	गोमते	गोमद्भ्याम्	गोमद्भ्यः
पं.	गोमतः	गोमद्भ्याम्	गोमद्भ्यः
ष.	गोमतः	गोमतोः	गोमताम्
स.	गोमति	गोमतोः	गोमत्सु

(गोमन्तम् इच्छति इति गोमान्-अहं गोमान्स्यामितीच्छुः)

२७३ तकारान्तः पुंलिङ्गः 'भवत्' शब्दः।

m. Your honour.

	एकव०	द्विव०	बहुव०
प्र.	भवान्	भवन्तौ	भवन्तः
सं.	हे भवन्	हे भवन्तौ	हे भवन्तः
द्वि.	भवन्तम्	भवन्तौ	भवतः
तृ.	भवता	भवद्भ्याम्	भवद्भिः
च.	भवते	भवद्भ्याम्	भवद्भ्यः
पं.	भवतः	भवद्भ्याम्	भवद्भ्यः
ष.	भवतः	भवतोः	भवताम्
स.	भवति	भवतोः	भवत्सु

(भाति दीप्यते इति भवान्–शोभनः त्वम्)

एवं–तत्रभवत्, अत्रभवत्, ततोभवत्, अतोभवत्।

२७४ तकारान्तः पुंलिङ्गः 'ददत्' शब्दः।

m. Giving.

प्र.	ददत्, ददद्	ददतौ	ददतः
सं.	हे ददत्, हे ददद्	हे ददतौ	हे ददतः
द्वि.	ददतम्	ददतौ	ददतः
तृ.	ददता	ददद्भ्याम्	ददद्भिः
च.	ददते	ददद्भ्याम्	ददद्भ्यः
पं.	ददतः	ददद्भ्याम्	ददद्भ्यः
ष.	ददतः	ददतोः	ददताम्
स.	ददति	ददतोः	ददत्सु

(ददाति इति ददत्–दाता.)

एवं–दधत्,

२७५ तकारान्तः पुँल्लिङ्गः 'जक्षत्' शब्दः ।

m. Eating.

	एकव०	द्विव०	बहुव०
प्र.	जक्षत्, जक्षद्	जक्षतौ	जक्षतः
सं.	हे जक्षत्, हे जक्षद्	हे जक्षतौ	हे जक्षतः
द्वि.	जक्षतम्	जक्षतौ	जक्षतः
तृ.	जक्षता	जक्षद्भ्याम्	जक्षद्भिः
च.	जक्षते	जक्षद्भ्याम्	जक्षद्भ्यः
पं.	जक्षतः	जक्षद्भ्याम्	जक्षद्भ्यः
ष.	जक्षतः	जक्षतोः	जक्षताम्
स.	जक्षति	जक्षतोः	जक्षत्सु

(अत्ति इति जक्षत्–अत्ता भक्षकः)

२७६ तकारान्तः पुँल्लिङ्गः 'जाग्रत्' शब्दः ।

m. Waking.

प्र.	जाग्रत्, जाग्रद्	जाग्रतौ	जाग्रतः
सं.	हे जाग्रत्, हे जाग्रद्	हे जाग्रतौ	हे जाग्रतः
द्वि.	जाग्रतम्	जाग्रतौ	जाग्रतः
तृ.	जाग्रता	जाग्रद्भ्याम्	जाग्रद्भिः
च.	जाग्रते	जाग्रद्भ्याम्	जाग्रद्भ्यः
पं.	जाग्रतः	जाग्रद्भ्याम्	जाग्रद्भ्यः
ष.	जाग्रतः	जाग्रतोः	जाग्रताम्
स	जाग्रति	जाग्रतोः	जाग्रत्सु

(जागर्ति इति जाग्रत्–जागरूकः विनिद्रः)

एवं-दरिद्रत् (दरिद्राति इति दरिद्रत्), शासत् (शास्ति इति शासत्), चकासत् (चकास्ति इति चकासत्), दीध्यत् (दीध्यते–दीप्यते, दीध्यति इति दीध्यत्), वेव्यत् (वेवीति=गच्छति इति वेव्यत्) एते शब्दा ज्ञेयाः ।

२७७ पकारान्तः पुँल्लिङ्गः 'गुप्' शब्दः ।

m Protecting.

	एकव०	द्विव०	बहुव०
प्र.	गुप्, गुब्	गुपौ	गुपः
सं.	हे गुप्, हे गुब्	हे गुपौ	हे गुपः
द्वि.	गुपम्	गुपौ	गुपः
तृ.	गुपा	गुब्भ्याम्	गुब्भिः
च.	गुपे	गुब्भ्याम्	गुब्भ्यः
प.	गुपः	गुब्भ्याम्	गुब्भ्यः
ष.	गुपः	गुपोः	गुपाम्
स.	गुपि	गुपोः	गुप्सु

(गोपायति इति गुप्–रक्षकः)

एवं–लुप्, ऊप्, शप्, सरीसृप, असुतृप्, दृप्प्रभृतयः ।

२७८ शकारान्तः पुँल्लिङ्गः 'तादृश्' शब्दः ।

m. Of that kind.

प्र.	तादृक्, तादृग्	तादृशौ	तादृशः
स.	हे तादृक्, हे तादृग्	हे तादृशौ	हे तादृशः
द्वि.	तादृशम्	तादृशौ	तादृशः
तृ.	तादृशा	तादृग्भ्याम्	तादृग्भिः
च.	तादृशे	तादृग्भ्याम्	तादृग्भ्यः
पं.	तादृशः	तादृग्भ्याम्	तादृग्भ्यः
ष.	तादृशः	तादृशोः	तादृशाम्
स.	तादृशि	तादृशोः	तादृक्षु

(तमिव यं पश्यति इति तादृक्–तथाविधः)

एवं–त्वादृश्, मादृश्, एतादृश्, अन्यादृश्, भवादृश् प्रभृतयः ।

---

१ तादृख, तादृड्भ्याम्–इति केषांचिन्मतेन भवतीति बोध्यम् ।

२७९ शकारान्तः पुँल्लिङ्गः 'विश्' शब्दः ।

m. Entering, Subject.

	एकव०	द्विव०	बहुव०
प्र.	विट्, विड्	विशौ	विशः
सं.	हे विट्, हे विड्	हे विशौ	हे विशः
द्वि.	विशम्	विशौ	विशः
तृ.	विशा	विड्भ्याम्	विड्भिः
च.	विशे	विड्भ्याम्	विड्भ्यः
पं.	विशः	विड्भ्याम्	विड्भ्यः
ष.	विशः	विशोः	विशाम्
स.	विशि	विशोः	विट्त्सु, विट्सु

(विशति इति विट्=वैश्यः, प्रजाजनः)

२८० शकारान्तः पुँल्लिङ्गः 'नश्' शब्दः ।

m. Perishing.

प्र.	नक्, नग्; नट्, नड्	नशौ	नशः
सं	हे नक्, हे नग्; हे नट्, हे नड्	हे नशौ	हे नशः
द्वि.	नशम्	नशौ	नशः
तृ.	नशा	नग्भ्याम्, नड्भ्याम्	नग्भिः, नड्भिः
च.	नशे	नग्भ्याम्, नड्भ्याम्	नग्भ्यः, नड्भ्यः
पं.	नशः	नग्भ्याम्, नड्भ्याम्	नग्भ्यः, नड्भ्यः
ष.	नशः	नशोः	नशाम्
स.	नशि	नशोः	नक्षु; नट्त्सु, नट्सु

(नश्यति इति नक्-लुप्तः, अदृष्टः.)

२८१ शकारान्तः पुँलिङ्गः 'घृतस्पृश्' शब्दः ।

m. Boild rice mixed with clarified butter.

	एकव०	द्विव०	बहुव०
प्र	घृतस्पृक्, घृतस्पृग्	घृतस्पृशौ	घृतस्पृशः
स.	हे घृतस्पृक्, हे घृतस्पृग्	हे घृतस्पृशौ	हे घृतस्पृशः
द्वि.	घृतस्पृशम्	घृतस्पृशौ	घृतस्पृशः
तृ.	घृतस्पृशा	घृतस्पृग्भ्याम्	घृतस्पृग्भिः
च.	घृतस्पृशे	घृतस्पृग्भ्याम्	घृतस्पृग्भ्यः
पं.	घृतस्पृशः	घृतस्पृग्भ्याम्	घृतस्पृग्भ्यः
ष.	घृतस्पृशः	घृतस्पृशोः	घृतस्पृशाम्
स.	घृतस्पृशि	घृतस्पृशोः	घृतस्पृक्षु

(घृतं स्पृशति इति घृतस्पृक्–घृतमिश्र ओदनः)

एवं–क्षीरस्पृश्, दधिस्पृश्, सूपस्पृश्प्रभृतयः ।

२८२ शकारान्तः पुँलिङ्गः 'स्पृश्' शब्दः ।

m. touching.

प्र.	स्पृक्, स्पृग्	स्पृशौ	स्पृशः
स.	हे स्पृक्, हे स्पृग्,	हे स्पृशौ	हे स्पृशः
द्वि.	स्पृशम्	स्पृशौ	स्पृशः
तृ.	स्पृशा	स्पृग्भ्याम्	स्पृग्भिः
च.	स्पृशे	स्पृग्भ्याम्	स्पृग्भ्यः
पं.	स्पृशः	स्पृग्भ्याम्	स्पृग्भ्यः
ष.	स्पृशः	स्पृशोः	स्पृशाम्
स.	स्पृशि	स्पृशोः	स्पृक्षु

२८३ षकारान्तः पुँल्लिङ्गः 'दधृष्' शब्दः।

m. Bold.

	एकव०	द्विव०	बहुव०
प्र.	दधृक्, दधृग्	दधृषौ	दधृषः
स.	हे दधृक्, हे दधृग्	हे दधृषौ	हे दधृषः
द्वि.	दधृषम्	दधृषौ	दधृषः
तृ.	दधृषा	दधृग्भ्याम्	दधृग्भिः
च.	दधृषे	दधृग्भ्याम्	दधृग्भ्यः
पं.	दधृषः	दधृग्भ्याम्	दधृग्भ्यः
ष.	दधृषः	दधृषोः	दधृषाम्
स.	दधृषि	दधृषोः	दधृक्षु

(धृष्णोति प्रगल्भते इति दधृक्-प्रगल्भः)

२८४ षकारान्तः पुँल्लिङ्गः 'रत्नमुष्' शब्दः।

m. Stealing jewels.

प्र.	रत्नमुट्, रत्नमुड्	रत्नमुषौ	रत्नमुषः
स.	हे रत्नमुट्, हे रत्नमुड्	हे रत्नमुषौ	हे रत्नमुषः
द्वि.	रत्नमुषम्	रत्नमुषौ	रत्नमुषः
तृ.	रत्नमुषा	रत्नमुड्भ्याम्	रत्नमुड्भिः
च.	रत्नमुषे	रत्नमुड्भ्याम्	रत्नमुड्भ्यः
पं.	रत्नमुषः	रत्नमुड्भ्याम्	रत्नमुड्भ्यः
ष.	रत्नमुषः	रत्नमुषोः	रत्नमुषाम्
स.	रत्नमुषि	रत्नमुषोः	रत्नमुट्त्सु, रत्नमुट्सु

(रत्नानि मुष्णाति इति रत्नमुट्-रत्नचोरः)

एव-ब्रह्मद्विष्, पशुपुष्, प्रभृतयः।

२८५ षकारान्तः पुँल्लिङ्गो बहुवचनान्तः 'षष्' शब्दः।
२८६ षकारान्तः पुँल्लिङ्गो बहुवचनान्तः 'परमषष्' शब्दः।

m. Six.

	बहुव०	बहुव०
प्र	षट्, षड्	परमषट्, परमषड्
द्वि.	षट्, षड्	परमषट्, परमषड्
तृ.	षड्भिः	परमषड्भिः
च.	षड्भ्यः	परमषड्भ्यः
प.	षड्भ्यः	परमषड्भ्यः
ष.	षण्णाम्	परमषण्णाम्
स	षट्त्सु, षट्सु	परमषट्त्सु, परमषट्सु

२८७ षकारान्तः पुँल्लिङ्गः 'प्रियषष्' शब्दः।

m. One loving six.

	एकव०	द्विव०	बहुव०
प्र.	प्रियषट्, प्रियषड्	प्रियषषौ	प्रियषषः
सं.	हे प्रियषट्, हे प्रियषड्	हे प्रियषषौ	हे प्रियषषः
द्वि.	प्रियषषम्	प्रियषषौ	प्रियषषः
तृ.	प्रियषषा	प्रियषड्भ्याम्	प्रियषड्भिः
च.	प्रियषषे	प्रियषड्भ्याम्	प्रियषड्भ्यः
पं.	प्रियषषः	प्रियषड्भ्याम्	प्रियषड्भ्यः
ष.	प्रियषषः	प्रियषषोः	प्रियषषाम्
स.	प्रियषषि	प्रियषषोः	प्रियषट्त्सु, प्रियषट्सु

(प्रियाः षट् यस्य सः प्रियषट्)

२८८ षकारान्तः पुँल्लिङ्गः 'चिकीर्ष' शब्दः ।

m. Wishing to do.

	एकव०	द्विव०	बहुव०
प्र.	चिकीः	चिकीर्षौ	चिकीर्षः
सं.	हे चिकीः	हे चिकीर्षौ	हे चिकीर्षः
द्वि.	चिकीर्षम्	चिकीर्षौ	चिकीर्षः
तृ.	चिकीर्षा	चिकीर्भ्याम्	चिकीर्भिः
च.	चिकीर्षे	चिकीर्भ्याम्	चिकीर्भ्यः
पं.	चिकीर्षः	चिकीर्भ्याम्	चिकीर्भ्यः
ष.	चिकीर्षः	चिकीर्षोः	चिकीर्षाम्
स.	चिकीर्षि	चिकीर्षोः	चिकीर्ष्षु, चिकीःषु

(कर्तुमिच्छति चिकीर्षति, चिकीर्षति इति चिकीः=करणेच्छुः ।)

एवं-जिहीर्ष्, मुमूर्ष्,

२८९ षकारान्तः पुँल्लिङ्गः 'पिपठिष्' शब्दः ।

m. One Wishing to study.

प्र.	पिपठीः	पिपठिषौ	पिपठिषः
सं.	हे पिपठीः	हे पिपठिषौ	हे पिपठिषः
द्वि.	पिपठिषम्	पिपठिषौ	पिपठिषः
तृ.	पिपठिषा	पिपठीर्भ्याम्	पिपठीर्भिः
च.	पिपठिषे	पिपठीर्भ्याम्	पिपठीर्भ्यः
पं.	पिपठिषः	पिपठीर्भ्याम्	पिपठीर्भ्यः
ष.	पिपठिषः	पिपठिषोः	पिपठिषाम्
स.	पिपठिषि	पिपठिषोः	पिपठीःषु, पिपठीष्षु

(पठितुमिच्छति पिपठिषति, पिपठिषति इति पिपठीः=अध्ययनेच्छुः)

२९० षकारान्तः पुँल्लिङ्गः 'दोष्' शब्दः ।

m. An arm.

प्र.	दोः	दोषौ	दोषः
सं.	हे दोः	हे दोषौ	हे दोषः

	एकव०	द्विव०	बहुव०
द्वि	दोषम्	दोषौ	दोष्ण, दोष
तृ	दोष्णा, दोषा	दोषभ्याम्, दोर्भ्याम्	दोषभिः, दोर्भि
च	दोष्णे, दोषे	दोषभ्याम्, दोर्भ्याम्	दोषभ्यः, दोर्भ्य
प	दोष्णः, दोष	दोषभ्याम् दोर्भ्याम्	दोषभ्य, दोर्भ्यः
ष	दोष्ण, दोषः	दोष्णाः, दोषो	दोष्णाम्, दोषाम्
स	दोष्णि दोषणि दोषि	दोष्णो, दोषोः	दोषसु, दोष्णु, दो षु

(दाम्यति अनेन इति दो –भुजः)

२९१ षकारान्त. पुँल्लिङ्गः 'विविक्ष्' शब्द ।

m Wishing to enter.

प्र	विविट्, विविड	विविक्षौ	विविक्ष
स	हे विविट हे विविड्	हे विविक्षौ	हे विविक्ष
द्वि	विविक्षम्	विविक्षौ	विविक्षः
तृ	विविक्षा	विविड्भ्याम्	विविड्भि
च	विविक्ष	विविड्भ्याम्	विविड्भ्य
प	विविक्षः	विविड्भ्याम्	विविड्भ्यः
ष	विविक्ष	विविक्षोः	विविक्षाम्
स	विविक्षि	विविक्षोः	विविट्त्सु, विविट्सु

(वेष्टुमिच्छति विविक्षति,–विविक्षति इति विविट्=प्रवेशेच्छुकः)

२९२ षकारान्तः पुँल्लिङ्गः 'तक्ष्' शब्दः ।

m. Paring cutting

प्र	तक् तग तट् तड्	तक्षौ	तक्षः
स	हे तक् हे तग हे तट्, हे तड्	हे तक्षौ	हे तक्ष

	एकव॰	द्विव॰	बहुव॰
द्वि	तक्षम्	तक्षौ	तक्ष
तृ	तक्षा	तग्भ्याम्, तड्भ्याम्	तग्भि, तड्भि
च.	तक्षे	तग्भ्याम्, तड्भ्याम्	तग्भ्य, तड्भ्य
प	तक्षः	तग्भ्याम, तड्भ्याम्	तग्भ्य, तड्भ्य
ष.	तक्ष	तक्षो	तक्षाम्
स	तक्षि	तक्षो	तक्षु, तट्त्सु, तट्सु

(तक्ष्णोति तनूकरोति इति तट्=तष्टा)

(तक्षयति अन्यत इति तक्=तष्टा)

२९३ षकारान्तः पुँल्लिङ्गः 'गोरक्ष' शब्दः ।

m One who protects cows

प्र	गोरक्, गोरग्, गोरट्, गोरड्	गोरक्षौ	गोरक्ष
स	हे गोरक्, हे गोरग, हे गोरट् हे गोरड्	हे गारक्षौ	हे गोरक्ष
द्वि	गोरक्षम्	गोरक्षौ	गोरक्ष
तृ	गोरक्षा	गोरग्भ्याम्, गोरड्भ्याम्	गोरग्भि, गोरड्भि
च	गोरक्षे	गोरग्भ्याम्, गोरड्भ्याम्	गोरग्भ्य, गोरड्भ्य
प	गोरक्ष	गोरग्भ्याम्, गोरड्भ्याम्	गोरग्भ्य, गोरड्भ्य
ष	गोरक्ष	गोरक्षो	गोरक्षाम्
स	गोरक्षि	गोरक्षो	गोरक्षु, गोरट्त्सु, गोरट्सु

(गा रक्षयति अन्येन इति गोरक्–गोपालयिता, गाः रक्षति स्वयमिति गोरट्–गोपाल)

२९४ षकारान्तः पुँलिङ्गः 'पिपक्ष्' शब्दः ।

m. Desirous of cooking.

	एकव०	द्विव०	बहुव०
प्र.	पिपक्, पिपग्	पिपक्षौ	पिपक्षः
स.	हे पिपक्, हे पिपग्	हे पिपक्षौ	हे पिपक्षः
द्वि.	पिपक्षम्	पिपक्षौ	पिपक्षः
तृ.	पिपक्षा	पिपग्भ्याम्	पिपग्भिः
च.	पिपक्षे	पिपग्भ्याम्	पिपग्भ्यः
पं.	पिपक्षः	पिपग्भ्याम्	पिपग्भ्यः
ष	पिपक्षः	पिपक्षोः	पिपक्षाम्
स.	पिपक्षि	पिपक्षोः	पिपक्षु

(पक्तुमिच्छति पिपक्षति, पिपक्षति इति पिपक्=पाकेच्छुः).

२९५ षकारान्तः पुँलिङ्गः 'विवक्ष्' शब्दः ।

m. Desirous of speaking.

प्र.	विवक्, विवग्	विवक्षौ	विवक्षः
सं.	हे विवक्, हे विवग्	हे विवक्षौ	हे विवक्षः
द्वि.	विवक्षम्	विवक्षौ	विवक्षः
तृ.	विवक्षा	विवग्भ्याम्	विवग्भिः
च.	विवक्षे	विवग्भ्याम्	विवग्भ्यः
प.	विवक्षः	विवग्भ्याम्	विवग्भ्यः
ष.	विवक्षः	विवक्षोः	विवक्षाम्
स.	विवक्षि	विवक्षोः	विवक्षु

(वक्तुमिच्छति विवक्षति, विवक्षति इति विवक्=वचनेच्छुः)

२९६ षकारान्तः पुँलिङ्गः 'दिधक्ष्' शब्दः ।

m. Desirous of burning.

प्र	दिधक्, दिधग्	दिधक्षौ	दिधक्षः
सं.	हे दिधक्, हे दिधग्	हे दिधक्षौ	हे दिधक्षः

	एकव०	द्विव०	बहुव०
द्वि.	दिधक्षम्	दिधक्षौ	दिधक्षः
तृ.	दिधक्षा	दिधग्भ्याम्	दिधग्भिः
च.	दिधक्षे	दिधग्भ्याम्	दिधग्भ्यः
पं.	दिधक्षः	दिधग्भ्याम्	दिधग्भ्यः
ष.	दिधक्षः	दिधक्षोः	दिधक्षाम्
स.	दिधक्षि	दिधक्षोः	दिधक्षु

(दग्धुमिच्छति दिधक्षति,–दिधक्षति इति दिधक्=दहनेच्छुः)

२९७ षकारान्तः पुँल्लिङ्गः 'सुपिस्' शब्दः ।

m. One stepping well.

प्र.	सुपीः	सुपिसौ	सुपिसः
सं.	हे सुपीः	हे सुपिसौ	हे सुपिसः
द्वि.	सुपिसम्	सुपिसौ	सुपिसः
तृ.	सुपिसा	सुपीर्भ्याम्	सुपीर्भिः
च.	सुपिसे	सुपीर्भ्याम्	सुपीर्भ्यः
पं.	सुपिसः	सुपीर्भ्याम्	सुपीर्भ्यः
ष.	सुपिसः	सुपिसोः	सुपिसाम्
स.	सुपिसि	सुपिसोः	{ सुपीष्षु, सुपीःषु

(सुष्ठु पेसति गच्छति इति सुपी:=सुगन्ता)

२९८ षकारान्तः पुँल्लिङ्गः 'सुतुस' शब्दः ।

m. One cutting well.

प्र.	सुतूः	सुतुसौ	सुतुसः
सं.	हे सुतूः	हे सुतुसौ	हे सुतुसः
द्वि.	सुतुसम्	सुतुसौ	सुतुसः
तृ.	सुतुसा	सुतूर्भ्याम्	सुतूर्भिः
च.	सुतुसे	सुतूर्भ्याम्	सुतूर्भ्यः
पं.	सुतुसः	सुतूर्भ्याम्	सुतूर्भ्यः
ष.	सुतुसः	सुतुसोः	सुतुसाम्
स.	सुतुसि	सुतुसोः	{ सुतूष्षु, सुतूःषु

(सुष्ठु तोसति खण्डयति इति सुतूः=सुखण्डकः)

२९९ सकारान्तः पुंलिङ्गो 'विद्वस्' शब्दः।

m. Learned.

	एकव॰	द्विव॰	बहुव॰
प्र.	विद्वान्	विद्वांसौ	विद्वांसः
सं.	हे विद्वन्	हे विद्वांसौ	हे विद्वांसः
द्वि	विद्वांसम्	विद्वांसौ	विदुषः
तृ.	विदुषा	विद्वद्भ्याम्	विद्वद्भिः
च.	विदुषे	विद्वद्भ्याम्	विद्वद्भ्यः
पं.	विदुषः	विद्वद्भ्याम्	विद्वद्भ्यः
ष.	विदुषः	विदुषोः	विदुषाम्
स.	विदुषि	विदुषोः	विद्वत्सु

(वेद इति विद्वान्=पण्डितः)

एवं—दाश्वस्, मीढ्वस्, साह्वस्, जगन्वस्, प्रभृतयः।

३०० सकारान्तः पुँलिङ्गः 'सेदिवस्' शब्दः।

m. Sitting seated.

प्र.	सेदिवान्	सेदिवांसौ	सेदिवांसः
सं.	हे सेदिवन्	हे सेदिवांसौ	हे सेदिवांसः
द्वि.	सेदिवांसम्	सेदिवांसौ	सेदुषः
तृ.	सेदुषा	सेदिवद्भ्याम्	सेदिवद्भिः
च.	सेदुषे	सेदिवद्भ्याम्	सेदिवद्भ्यः
प.	सेदुषः	सेदिवद्भ्याम्	सेदिवद्भ्यः
ष.	सेदुषः	सेदुषोः	सेदुषाम्
स.	सेदुषि	सेदुषोः	सेदिवत्सु

(ससाद इति सेदिवान्–स्थितः)

एवं—तस्थिवस्, जग्मिवस्, उपेयिवस्, प्रभृतयः।

३०१ सकारान्तः पुँलिङ्गः 'सुहिंस्' शब्दः।

m. One who kills well.

प्र.	सुहिन्	सुहिंसौ	सुहिंसः
सं.	हे सुहिन्	हे सुहिंसौ	हे सुहिंसः

	एकव०	द्विव०	बहुव०
द्वि.	सुहिंसम्	सुहिंसौ	सुहिंसः
तृ.	सुहिंसा	सुहिन्भ्याम्	सुहिन्भिः
च.	सुहिंसे	सुहिन्भ्याम्	सुहिन्भ्यः
पं.	सुहिंसः	सुहिन्भ्याम्	सुहिन्भ्यः
ष.	सुहिंसः	सुहिंसोः	सुहिंसाम्
स.	सुहिंसि	सुहिंसोः	सुहिंसु

(सुष्ठु हिनस्ति इति सुहिन्=सुहिंसक.)

३०२ सकारान्तः पुंलिङ्गः 'ध्वंस्' शब्दः ।

m. A destroyer.

प्र.	ध्वत्, ध्वद्	ध्वसौ	ध्वसः
स.	हे ध्वत्, हे ध्वद्	हे ध्वसौ	हे ध्वसः
द्वि.	ध्वसम्	ध्वसौ	ध्वसः
तृ.	ध्वसा	ध्वद्भ्याम्	ध्वद्भिः
च.	ध्वसे	ध्वद्भ्याम्	ध्वद्भ्यः
प.	ध्वसः	ध्वद्भ्याम्	ध्वद्भ्यः
ष.	ध्वसः	ध्वसोः	ध्वसाम्
स.	ध्वसि	ध्वसोः	ध्वत्सु

(ध्वंसति अधः पतति इति ध्वत्=अधःपाती).

३०३ सकारान्तः पुँल्लिङ्गः 'स्रंस्' शब्दः ।

m. That falls.

	एकव०	द्विव०	बहुव०
प्र.	स्रत्, स्रद्	स्रसौ	स्रसः
स.	हे स्रत्, हे स्रद्	हे स्रसौ	हे स्रसः
द्वि.	स्रसम्	स्रसौ	स्रसः
तृ.	स्रसा	स्रद्भ्याम्	स्रद्भिः
च.	स्रसे	स्रद्भ्याम्	स्रद्भ्यः

एकव॰	द्विव॰	बहुव॰
प. स्रसः	स्रद्भ्याम्	स्रद्भ्यः
ष. स्रसः	स्रसोः	स्रसाम्
स स्रसि	स्रसोः	स्रत्सु

(स्रंसति अधः पतति इति स्रत्=अधः पातुकः)

३०४ सकारान्तः पुँल्लिङ्गः 'पुंस्' शब्दः ।

m. A man.

प्र. पुमान्	पुमांसौ	पुमांसः
सं. हे पुमन्	हे पुमांसौ	हे पुमांसः
द्वि पुमांसम्	पुमांसौ	पुंसः
तृ. पुंसा	पुम्भ्याम्	पुंभिः
च. पुंसे	पुम्भ्याम्	पुम्भ्यः
प. पुंसः	पुम्भ्याम्	पुम्भ्यः
ष. पुंसः	पुंसोः	पुंसाम्
स. पुंसि	पुंसोः	पुंसु[१]

(पुनाति पवित्रयति कुलमिति पुमान्=पुरुषः)

३०५ सकारान्तः पुँल्लिङ्गः 'उशनस्' शब्दः ।

m. A name of शुक्राचार्य.

प्र उशना	उशनसौ	उशनसः
स { हे उशनन्, हे उशन, हे उशनः	हे उशनसौ	हे उशनसः
द्वि उशनसम्	उशनसौ	उशनसः
तृ उशनसा	उशनोभ्याम्	उशनोभिः
च. उशनसे	उशनोभ्याम्	उशनोभ्यः
प. उशनसः	उशनोभ्याम्	उशनोभ्यः
ष. उशनसः	उशनसोः	उशनसाम्
स. उशनसि	उशनसोः	{ उशनस्सु, उशनःसु

(वष्टि इत्युशना=शुक्रः)

१ 'पुंक्षु' इति सारस्वतव्याकरणानुयायिनः ।

३०६ सकारान्तः पुँल्लिङ्गः 'अनेहस्' शब्दः।

m. Time.

	एकव॰	द्विव॰	बहुव॰
प्र.	अनेहा	अनेहसौ	अनेहसः
सं.	हे अनेहः	हे अनेहसौ	हे अनेहसः
द्वि.	अनेहसम्	अनेहसौ	अनेहसः
तृ.	अनेहसा	अनेहोभ्याम्	अनेहोभिः
च.	अनेहसे	अनेहोभ्याम्	अनेहोभ्यः
पं.	अनेहसः	अनेहोभ्याम्	अनेहोभ्यः
ष.	अनेहसः	अनेहसोः	अनेहसाम्
स.	अनेहसि	अनेहसोः	{ अनेहःसु, अनेहस्सु

(अनेहा=कालः)

३०७ सकारान्तः पुँल्लिङ्गः 'वेधस्' शब्दः।

m. A name of ब्रह्मा.

प्र.	वेधा	वेधसौ	वेधसः
स.	हे वेधः	हे वेधसौ	हे वेधसः
द्वि.	वेधसम्	वेधसौ	वेधसः
तृ.	वेधसा	वेधोभ्याम्	वेधोभिः
च	वेधसे	वेधोभ्याम्	वेधोभ्यः
पं.	वेधसः	वेधोभ्याम्	वेधोभ्यः
ष.	वेधसः	वेधसोः	वेधसाम्
स.	वेधसि	वेधसोः	{ वेधस्सु, वेधःसु

(वेधाः=ब्रह्मा)

एवं—चन्द्रमस्, सुयशस्, विमलपयस्, सचेतस्, सुमनस्, विमनस्, सुवासस्, दुर्वासस्, प्रभृतयः।

३०८ सकारान्तः पुँल्लिङ्गः 'सुवस्' शब्दः ।

m. One who wears a good garment with.

	एकव०	द्विव०	बहुव०
प्र.	सुवः	सुवसौ	सुवसः
सं.	हे सुवः	हे सुवसौ	हे सुवसः
द्वि.	सुवसम्	सुवसौ	सुवसः
तृ.	सुवसा	सुवोभ्याम्	सुवोभिः
च.	सुवसे	सुवोभ्याम्	सुवोभ्यः
पं.	सुवसः	सुवोभ्याम्	सुवोभ्यः
ष.	सुवसः	सुवसोः	सुवसाम्
स.	सुवसि	सुवसोः	सुवस्सु, सुवःसु

(सुष्ठु वस्ते असौ सुवः—शोभननिवासी)

३०९ सकारान्तः पुँल्लिङ्गः 'पिण्डग्रस्' शब्दः ।

m. A crow.

प्र.	पिण्डग्रः	पिण्डग्रसौ	पिण्डग्रसः
स.	हे पिण्डग्रः	हे पिण्डग्रसौ	हे पिण्डग्रसः
द्वि.	पिण्डग्रसम्	पिण्डग्रसौ	पिण्डग्रसः
तृ.	पिण्डग्रसा	पिण्डग्रोभ्याम्	पिण्डग्रोभिः
च.	पिण्डग्रसे	पिण्डग्रोभ्याम्	पिण्डग्रोभ्यः
पं.	पिण्डग्रसः	पिण्डग्रोभ्याम्	पिण्डग्रोभ्यः
ष.	पिण्डग्रसः	पिण्डग्रसोः	पिण्डग्रसाम्
स.	पिण्डग्रसि	पिण्डग्रसोः	पिण्डग्रस्सु, पिण्डग्रःसु

(पिण्डं ग्रसते अस्ति असौ पिण्डग्र:=काकः)

३१० सकारान्तः पुँल्लिङ्गः 'पिण्डग्लस्' शब्दः ।

m. One who eats पिण्डाज्, a crow.

प्र.	पिण्डग्लः	पिण्डग्लसौ	पिण्डग्लसः
सं.	हे पिण्डग्लः	हे पिण्डग्लसौ	हे पिण्डग्लसः
द्वि.	पिण्डग्लसम्	पिण्डग्लसौ	पिण्डग्लसः

	एकव०	द्विव०	बहुव०
तृ.	पिण्डग्लसा	पिण्डग्लोभ्याम्	पिण्डग्लोभिः
च.	पिण्डग्लसे	पिण्डग्लोभ्याम्	पिण्डग्लोभ्यः
पं.	पिण्डग्लसः	पिण्डग्लोभ्याम्	पिण्डग्लोभ्यः
ष.	पिण्डग्लसः	पिण्डग्लसोः	पिण्डग्लसाम्
स.	पिण्डग्लसि	पिण्डग्लसोः	पिण्डग्लस्सु, पिण्डग्लःसु

(पिण्डं ग्लसते आत्ति असौ पिण्डग्लः=काकः)

३११ सकारान्तः पुंल्लिङ्गः सर्वनामसंज्ञकः 'अदस्' शब्दः।

m. That.

प्र.	असौ	अमू	अमी
द्वि.	अमुम्	अमू	अमून्
तृ.	अमुना	अमूभ्याम्	अमीभिः
च.	अमुष्मै	अमूभ्याम्	अमीभ्यः
पं.	अमुष्मात्	अमूभ्याम्	अमीभ्यः
ष.	अमुष्य	अमुयोः	अमीषाम्
स.	अमुष्मिन्	अमुयोः	अमीषु

३१२ सकारान्तः पुँल्लिङ्गः 'अदकस्' शब्दः।

m. Certain, so and so.

प्र.	असकौ	अमुकौ	अमुके
द्वि.	अमुकम्	अमुकौ	अमुकान्
तृ.	अमुकेन	अमुकाभ्याम्	अमुकैः
च.	अमुकस्मै	अमुकाभ्याम्	अमुकेभ्यः
पं.	अमुकस्मात्	अमुकाभ्याम्	अमुकेभ्यः
ष.	अमुकस्य	अमुकयोः	अमुकेषाम्
स.	अमुकस्मिन्	अमुकयोः	अमुकेषु

इति हलन्तपुँल्लिङ्गशब्दाः।

CHAPTER VI.

Feminine nouns ending in consonants

अथ हलन्तस्त्रीलिङ्गशब्दाः ।

३१३ हकारान्तः स्त्रीलिङ्गः 'उपानह' शब्दः ।

f. A shoe.

	एकव०	द्विव०	बहुव०
प्र.	उपानत्, उपानद्	उपानहौ	उपानहः
स	हे उपानत्, हे उपानद्	हे उपानहौ	हे उपानहः
द्वि.	उपानहम्	उपानहौ	उपानहः
तृ	उपानहा	उपानद्भ्याम्	उपानद्भिः
च.	उपानहे	उपानद्भ्याम्	उपानद्भ्यः
प	उपानहः	उपानद्भ्याम्	उपानद्भ्य.
ष.	उपानहः	उपानहोः	उपानहाम्
स.	उपानहि	उपानहोः	उपानत्सु

(उपनह्येते चरणौ यया सा उपानत्=चर्मपादूः)

३१४ हकारान्तः स्त्रीलिङ्गः 'उष्णिह्' शब्दः ।

f A kind of metre, a barley soup.

प्र.	उष्णिक्, उष्णिग्	उष्णिहौ	उष्णिहः
स	हे उष्णिक्, हे उष्णिग्	हे उष्णिहौ	हे उष्णिह.
द्वि.	उष्णिहम्	उष्णिहौ	उष्णिहः
तृ.	उष्णिहा	उष्णिग्भ्याम्	उष्णिग्भि.
च.	उष्णिहे	उष्णिग्भ्याम्	उष्णिग्भ्य
प.	उष्णिहः	उष्णिग्भ्याम्	उष्णिग्भ्यः
ष.	उष्णिहः	उष्णिहोः	उष्णिहाम्
स.	उष्णिहि	उष्णिहोः	उष्णिक्षु

(उत्स्निह्यते प्रीयते अनया इत्युष्णिक्=यवागूः)

३१५ वकारान्तः स्त्रीलिङ्गः 'दिव्' शब्दः ।

f. The heaven.

	एकव०	द्विव०	बहुव०
प्र.	द्यौः	दिवौ	दिवः
सं.	हे द्यौः	हे दिवौ	हे दिवः
द्वि.	दिवम्	दिवौ	दिवः
तृ.	दिवा	द्युभ्याम्	द्युभिः
च.	दिवे	द्युभ्याम्	द्युभ्यः
पं.	दिवः	द्युभ्याम्	द्युभ्यः
ष.	दिवः	दिवोः	दिवाम्
स.	दिवि	दिवोः	द्युषु

(दीव्यन्ति क्रीडन्ति देवाः यस्यां सा द्यौः=स्वर्गः)

३१६ रेफान्तः स्त्रीलिङ्गः 'गिर्' शब्दः ।

f. Speech.

प्र.	गीः	गिरौ	गिरः
स.	हे गीः	हे गिरौ	हे गिरः
द्वि.	गिरम्	गिरौ	गिरः
तृ.	गिरा	गीर्भ्याम्	गीर्भिः
च.	गिरे	गीर्भ्याम्	गीर्भ्यः
पं.	गिरः	गीर्भ्याम्	गीर्भ्यः
ष.	गिरः	गिरोः	गिराम्
स.	गिरि	गिरोः	गीर्षु

(गीर्यते उच्चार्यते अनया इति गीः=वाणी)

३१७ रेफान्तः स्त्रीलिङ्गः 'पुर्' शब्दः ।

f. A town.

प्र.	पूः	पुरौ	पुरः
स.	हे पूः	हे पुरौ	हे पुरः
द्वि.	पुरम्	पुरौ	पुरः
तृ.	पुरा	पूर्भ्याम्	पूर्भिः
च.	पुरे	पूर्भ्याम्	पूर्भ्यः

	एकव०	द्विव०	बहुव०
पं.	पुरः	पूर्भ्याम्	पूर्भ्यः
ष.	पुरः	पुरोः	पुराम्
स.	पुरि	पुरोः	पूर्षु

(पूर्यन्ते जनाः यस्यां सा पूः=नगरी.)

३१८ रेफान्तः स्त्रीलिङ्गः बहुवचनान्तः 'चतुर्' शब्दः ।

f. Four.

	बहुव०
प्र.	चतस्रः
सं.	हे चतस्रः
द्वि.	चतस्रः
तृ.	चतसृभिः
च.	चतसृभ्यः
प.	चतसृभ्यः
ष.	चतसृणाम्
स.	चतसृषु

(चतस्रः=चतुःसंख्याः)

३१९ मकारान्तः स्त्रीलिङ्गः 'किम्' शब्दः ।

f. Who.

प्र.	का	के	काः
द्वि.	काम्	के	काः
तृ.	कया	काभ्याम्	काभिः
च.	कस्यै	काभ्याम्	काभ्यः
प.	कस्याः	काभ्याम्	काभ्य
ष	कस्याः	कयोः	कासाम्
स	कस्याम्	कयोः	कासु

३२० मकारान्तः स्त्रीलिङ्गः 'इदम्' शब्दः ।

f. This.

प्र.	इयम्	इमे	इमाः
द्वि.	{ इमाम्, एनाम्	{ इमे, एने	{ इमाः, एनाः,

एकव०	द्विव०	बहुव०
तृ. { अनया, एनया	आभ्याम्	आभिः
च. अस्यै	आभ्याम्	आभ्यः
पं. अस्याः	आभ्याम्	आभ्यः
ष. अस्याः	{ अनयोः, एनयोः	आसाम्
स. अस्याम्	{ अनयोः, एनयोः	आसु

३२१ जकारान्तः स्त्रीलिङ्गः 'स्रज्' शब्दः ।

f. A garland.

प्र. { स्रक्, स्रग्	स्रजौ	स्रजः
स. { हे स्रक्, हे स्रग्	हे स्रजौ	हे स्रजः
द्वि. स्रजम्	स्रजौ	स्रजः
तृ. स्रजा	स्रग्भ्याम्	स्रग्भिः
च. स्रजे	स्रग्भ्याम्	स्रग्भ्यः
पं. स्रजः	स्रग्भ्याम्	स्रग्भ्यः
ष. स्रजः	स्रजोः	स्रजाम्
स. स्रजि	स्रजोः	स्रक्षु

(सृजति शोभामिति स्रक्=माला)

३२२ दकारान्त स्त्रीलिङ्गः सर्वनामसंज्ञकः 'त्यद्' शब्दः ।

f That one (वाह).

प्र. स्या	त्ये	त्याः
द्वि. त्याम्	त्ये	त्याः
तृ. त्यया	त्याभ्याम्	त्याभिः
च. त्यस्यै	त्याभ्याम्	त्याभ्यः
पं. त्यस्याः	त्याभ्याम्	त्याभ्यः
ष. त्यस्याः	त्ययोः	त्यासाम्
स. त्यस्याम्	त्ययोः	त्यासु

३२३ दकारान्तः स्त्रीलिङ्गः सर्वनामसञ्ज्ञकः 'तद्' शब्दः

f. That one (she).

	एकव०	द्विव०	बहु०
प्र.	सा	ते	ताः
द्वि.	ताम्	ते	ताः
तृ	तया	ताभ्याम्	ताभिः
च.	तस्यै	ताभ्याम्	ताभ्यः
प.	तस्याः	ताभ्याम्	ताभ्यः
ष.	तस्याः	तयोः	तासाम्
स.	तस्याम्	तयोः	तासु

३२४ दकारान्तः स्त्रीलिङ्गः 'यद्' शब्दः।

f. Who or which.

प्र.	या	ये	याः
द्वि.	याम्	ये	याः
तृ.	यया	याभ्याम्	याभिः
च.	यस्यै	याभ्याम्	याभ्यः
प.	यस्याः	याभ्याम्	याभ्यः
ष.	यस्याः	ययोः	यासाम्
स.	यस्याम्	ययोः	यासु

३२५ दकारान्तः स्त्रीलिङ्गः सर्वनामसञ्ज्ञकः 'एतद्' शब्दः। *f.* This.

प्र.	एषा	एते	एताः
द्वि.	एताम्, एनाम्	एते, एने	एताः, एनाः
तृ.	एतया, एनया	एताभ्याम्	एताभिः
च.	एतस्यै	एताभ्याम्	एताभ्यः
प.	एतस्याः	एताभ्याम्	एताभ्यः
ष.	एतस्याः	एतयोः, एनयोः	एतासाम्
स.	एतस्याम्	एतयोः, एनयोः	एतासु

३२६ चकारान्तः स्त्रीलिङ्गो 'वाच्' शब्दः।

f. Speech.

	एकव०	द्विव०	बहुव०
प्र	वाक्, वाग्	वाचौ	वाच
स.	हे वाक्, हे वाग्	हे वाचौ	हे वाच
द्वि	वाचम्	वाचौ	वाच
तृ	वाचा	वाग्भ्याम	वाग्भि
च	वाचे	वाग्भ्याम्	वाग्भ्य
प	वाच	वाग्भ्याम्	वाग्भ्य
ष.	वाच	वाचो	वाचाम्
स.	वाचि	वाचो	वाक्ष

(उच्यते अनया इति वाक्=वाणी)

एव–रुच, शुच्, मुच्,—प्रभृतय ।

३२७ पकारान्तः स्त्रीलिङ्गो बहुवचनान्तः 'अप्' शब्दः।

f Water

	ब० व०
प्र	आप
स	ह आप
द्वि.	अप
तृ	अद्भि
च	अद्भ्यः
प.	अद्भ्य
ष	अपाम्
स	अप्सु

३२८ शकारान्तःस्त्रीलिङ्ग 'दिश्' शब्दः।

f A direction

प्र	दिक्, दिग्	दिशौ	दिश
स	हे दिक्, हे दिग्	हे दिशौ	हे दिश

	एकव०	द्विव०	बहुव०
द्वि.	दिशम्	दिशौ	दिशः
तृ.	दिशा	दिग्भ्याम्	दिग्भिः
च.	दिशे	दिग्भ्याम्	दिग्भ्यः
प.	दिशः	दिग्भ्याम्	दिग्भ्यः
ष.	दिशः	दिशोः	दिशाम्
स.	दिशि	दिशोः	दिक्षु

(दिश्यंते इन्द्रादिस्थानानि यया इति दिक्=दिशा)

३२९ शकारान्तः स्त्रीलिङ्गः 'दृश्' शब्दः ।

f. Sight.

प्र.	दृक्, दृग्	दृशौ	दृशः
सं.	हे दृक्, हे दृग्	हे दृशौ	हे दृशः
द्वि.	दृशम्	दृशौ	दृशः
तृ.	दृशा	दृग्भ्याम्	दृग्भिः
च.	दृशे	दृग्भ्याम्	दृग्भ्यः
पं.	दृशः	दृग्भ्याम्	दृग्भ्यः
ष.	दृशः	दृशोः	दृशाम्
स.	दृशि	दृशोः	दृक्षु

(दृश्यन्ते पदार्थाः अनया इति दृक्=दृष्टिः)

३३० षकारान्तः स्त्रीलिङ्गः 'त्विष्' शब्दः ।

f. Splendour.

प्र	त्विट्, त्विड्	त्विषौ	त्विषः
सं.	हे त्विट्, हे त्विड्	हे त्विषौ	हे त्विषः
द्वि.	त्विषम्	त्विषौ	त्विषः
तृ.	त्विषा	त्विड्भ्याम्	त्विड्भिः
च.	त्विषे	त्विड्भ्याम्	त्विड्भ्यः
पं.	त्विषः	त्विड्भ्याम्	त्विड्भ्यः

	एकव०	द्विव०	बहुव०
ष	त्विष	त्विषो	त्विषाम
स	त्विषि	त्विषो	{ त्विट्त्सु, त्विट्सु

(त्विष्यते दीप्यते अनया इति त्विट्=कान्ति ।

एव–द्विष् मुष्

३३१ षकारान्त स्त्रीलिङ्ग ' सजुष् ' शब्दः ।

f A companion

प्र	सजू	सजुषौ	सजुष
स	हे सजू	हे सजुषो	हे सजुष
द्वि	सजुषम	सजुषौ	सजुष
तृ	सजुषा	सजूर्भ्याम	सजूर्भि
च	सजुषे	सजूर्भ्याम	सजूर्भ्य
प	सजुष	सजूर्भ्याम	सजूर्भ्य
ष	सजुष	सजुषो	सजुषाम
स	सजुषि	सजुषो	{ सजूष्षु सजूःषु

(सह जुषते प्रीणाति इति सजू=सखी ।

३३२ षकारान्त, स्त्रीलिङ्ग 'आशिष्' शब्दः ।

f A blessing

प्र	आशी	आशिषौ	आशिष
स	हे आशी	हे आशिषौ	हे आशिष
द्वि	आशिषम	आशिषौ	आशिष
तृ	आशिषा	आशीर्भ्याम्	आशीर्भिः
च	आशिष	आशीर्भ्याम	आशीर्भ्य
प	आशिष	आशीर्भ्याम्	आशीर्भ्य
ष	आशिष	आशिषा	आशिषाम्
स	आशिषि	आशिषा	{ आशीष्षु आशीःषु

(आशिष्यन्ते मङ्गलानि यया सा आशी =मङ्गलाशासनम्)

३३३ सकारान्तः स्त्रीलिङ्गः सर्वनामसञ्ज्ञकः

'अदस्' शब्दः । *f.* This or that.

	एकव०	द्विव०	बहुव०
प्र.	असौ	अमू	अमूः
द्वि.	अमूम्	अमू	अमूः
तृ.	अमुया	अमूभ्याम्	अमूभिः
च.	अमुष्यै	अमूभ्याम्	अमूभ्यः
प.	अमुष्याः	अमूभ्याम्	अमूभ्यः
ष.	अमुष्याः	अमुयोः	अमूषाम्
स.	अमुष्याम्	अमुयोः	अमूषु

शेषा. सर्वेऽपि हलन्तस्त्रीलिङ्गशब्दा हलन्तपुंलिङ्गवज्ज्ञेयाः ।

इति हलन्तस्त्रीलिङ्गशब्दाः ।

CHAPTER VII.

Neuter nouns ending in consonants

अथ हलन्तनपुंसकलिङ्गशब्दाः ।

३३४ हकारान्तो नपुंसकलिङ्गः 'स्वनडुह्' शब्दः ।

n. A bullock cart.

प्र.	स्वनडुत्, स्वनडुद्	स्वनडुही	स्वनड्वांहि
स.	हे स्वनडुत्, हे स्वनडुद्	हे स्वनडुही	हे स्वनड्वांहि
द्वि.	स्वनडुत्, स्वनडुद्	स्वनडुही	स्वनड्वांहि
तृ.	स्वनडुहा	स्वनडुद्भ्याम्	स्वनडुद्भिः
च.	स्वनडुहे	स्वनडुद्भ्याम्	स्वनडुद्भ्यः
प.	स्वनडुहः	स्वनडुद्भ्याम्	स्वनडुद्भ्यः
ष.	स्वनडुहः	स्वनडुहोः	स्वनडुहाम्
स.	स्वनडुहि	स्वनडुहोः	स्वनडुत्सु

(शोभनः अनड्वान् यस्मिन् तत् स्वनडुत्=यानम्)

३३५ वकारान्तो नपुंसकलिङ्गो 'विमलदिव्' शब्दः ।

n A fair day

	एकव०	द्विव०	बहुव०
प्र	विमलद्यु	विमलदिवी	विमलदिवि
स	हे विमलद्य	हे विमलदिवी	हे विमलदिवि
द्वि	विमलद्य	विमलदिवी	विमलदिवि
तृ.	विमलदिवा	विमलद्युभ्याम	विमलद्युभि
च	विमलदिवे	विमलद्युभ्याम्	विमलद्युभ्य
प	विमलदिव	विमलद्युभ्याम्	विमलद्युभ्य
ष	विमलदिव	विमलदिवा	विमलदिवाम
स	विमलदिवि	विमलदिवो	विमलद्युषु

(विमला निर्मला द्यौ आकाश यस्मिन् तत् विमलद्यु=दिनम्)

३३६ रेफान्तो नपुसकलिङ्गो 'वार्' शब्दः ।

n Water

प्र	वा	वारी	वारि
स	हे वा	हे वारी	हे वारि
द्वि	वा	वारी	वारि
तृ	वारा	वार्भ्याम्	वार्भि
च	वारे	वार्भ्याम	वार्भ्य
प	वार	वार्भ्याम्	वार्भ्य
ष	वार	वारो	वाराम्
स	वारि	वारो	वार्षु

(वा =जलम्)

३३७ रेफान्तो नपुसकलिङ्ग, बहुवचनान्त, 'चतुर्' शब्द ।

n Four

	बहुव०	बहुव०
प्र	चत्वारि	परमचत्वारि
स	हे चत्वारि	हे परमचत्वारि
द्वि	चत्वारि	परमचत्वारि
तृ	चतुर्भि	परमचतुर्भि
च	चतुर्भ्य	परमचतुर्भ्य
प	चतुर्भ्य	परमचतुर्भ्य
ष	चतुर्णाम्	परमचतुर्णाम
स	चतुर्षु	परमचतुर्षु

३३८ रेफान्तो नपुंसकलिङ्गः 'प्रियचतुर्' शब्दः।

n One who likes four

	एकव०	द्विव०	बहुव०
प्र	प्रियचतु	प्रियचतुरी	प्रियचत्वारि
स	हे प्रियचतु	हे प्रियचतुरी	हे प्रियचत्वारि
द्वि	प्रियचतु	प्रियचतुरी	प्रियचत्वारि
तृ	प्रियचतुरा	प्रियचतुर्भ्याम	प्रियचतुर्भि
च	प्रियचतुरे	प्रियचतुर्भ्याम	प्रियचतुर्भ्य
प	प्रियचतुर	प्रियचतुर्भ्याम्	प्रियचतुर्भ्यः
ष	प्रियचतुर	प्रियचतुरो	प्रियचतुराम्
स	प्रियचतुरि	प्रियचतुरो	प्रियचतुर्षु

(प्रिया चत्वार यस्य तत् प्रियचतु =प्रियचतु सख्यम्)

३३९ मकारान्तो नपुंसकलिङ्ग. 'किम्' शब्दः।

n Which

प्र	किम	के	कानि
द्वि	किम्	के	कानि
तृ	केन	काभ्याम	कै
च	कस्मै	काभ्याम्	केभ्य
प	कस्मात्	काभ्याम	केभ्य
ष	कस्य	कयो	केषाम्
स	कस्मिन्	कयो	केषु

(किम्=अनिर्दिष्टम्)

३४० मकारान्तो नपुंसकलिङ्गः 'इदम्' शब्द.।

n This

प्र	इदम्	इमे	इमानि
द्वि	इदम्, एनम्	इमे, एन	इमानि, एनानि
तृ	अनेन, एनेन	आभ्याम्	एभि
च	अस्मै	आभ्याम्	एभ्य

	एकव०	द्विव०	बहुव०
पं.	अस्मात्	आभ्याम्	एभ्यः
ष.	अस्य	अनयोः, एनयोः	एषाम्
स.	अस्मिन्	अनयोः, एनयोः	एषु

३४१ नकारान्तो नपुंसकलिङ्गो 'ब्रह्मन्' शब्दः ।

n. The soul of the universe.

प्र.	ब्रह्म	ब्रह्मणी	ब्रह्माणि
सं.	हे ब्रह्मन्, हे ब्रह्म	हे ब्रह्मणी	हे ब्रह्माणि
द्वि.	ब्रह्म	ब्रह्मणी	ब्रह्माणि
तृ.	ब्रह्मणा	ब्रह्मभ्याम्	ब्रह्मभिः
च.	ब्रह्मणे	ब्रह्मभ्याम्	ब्रह्मभ्यः
प.	ब्रह्मणः	ब्रह्मभ्याम्	ब्रह्मभ्यः
ष.	ब्रह्मणः	ब्रह्मणोः	ब्रह्मणाम्
स.	ब्रह्मणि	ब्रह्मणोः	ब्रह्मसु

(बृंहयति विश्वमिति ब्रह्म=आत्मा, वेदश्च.)

एवं—कर्मन्, शर्मन्, वर्मन्, प्रभृतयः ।

३४२ नकारान्तो नपुंसकलिङ्गो 'नामन्' शब्दः ।

n. A name.

प्र.	नाम	नामनी, नाम्नी	नामानि
सं.	हे नामन्, हे नाम	हे नामनी, हे नाम्नी	हे नामानि
द्वि.	नाम	नामनी, नाम्नी	नामानि
तृ.	नाम्ना	नामभ्याम्	नामभिः
च.	नाम्ने	नामभ्याम्	नामभ्यः
पं.	नाम्नः	नामभ्याम्	नामभ्यः

	एकव०	द्विव०	बहुव०
ष.	नाम्नः	नाम्नोः	नाम्नाम्
स.	नामनि, नाम्नि	नाम्नोः	नामसु

(आम्नायते पुनः पुनरभ्यस्यते इति नाम)

एवं—लोमन्, क्लोमन्, सीमन्, प्रभृतयः

